(8)[P6] 7.4.2.3(7)– वै । एतत् । कुर्वन्ति ।

वा एत देतद् वै वा एतत् कुर्वन्ति कुर्व न्त्येतद् वै वा एतत् कुर्वन्ति ।

(9)[P6] 7.4.2.3(8)– एतत् । कुर्वन्ति । यत् ।

एतत् कुर्वन्ति कुर्व न्त्येत देतत् कुर्वन्ति यद् यत् कुर्व न्त्येत देतत् कुर्वन्ति यत् ।

(10)[P6] 7.4.2.3(9)– कुर्वन्ति । यत् । त्रयः ।

कुर्वन्ति यद् यत् कुर्वन्ति कुर्वन्ति यत् त्रय स्त्रयो यत् कुर्वन्ति कुर्वन्ति यत् त्रयः ।

(11)[P6] 7.4.2.3(10)– यत् । त्रयः । त्रयस्त्रि(ग्म्)शाः ।

यत् त्रय स्त्रयो यद् यत् त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रयो यद् यत् त्रय स्त्रयस्त्रि(ग्म्)शाः ।

(12)[P6] 7.4.2.3(11)– त्रयः । त्रयस्त्रि(ग्म्)शाः । अन्वञ्चः ।

त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शा अन्वञ्चो ऽन्वञ्च स्त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शा अन्वञ्चः ।

(13)[P6] 7.4.2.3(12)– त्रयस्त्रि(ग्म्)शाः । अन्वञ्चः । मद्ध्ये ।

त्रयस्त्रि(ग्म्)शा अन्वञ्चो ऽन्वञ्च स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा अन्वञ्चो मद्ध्ये मद्ध्ये ऽन्वञ्च स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा अन्वञ्चो मद्ध्ये ।

(14)[P6] 7.4.2.3(12)– त्रयस्त्रि(ग्म्)शाः ।

त्रयस्त्रि(ग्म्)शा इति त्रयः – त्रि(ग्म्)शाः ।

(15)[P6] 7.4.2.3(13)– अन्वञ्चः । मद्ध्ये । अनिरुक्तः ।

अन्वञ्चो मद्ध्ये मद्ध्ये ऽन्वञ्चो ऽन्वञ्चो मद्ध्ये ऽनिरुक्तो ऽनिरुक्तो मद्ध्ये ऽन्वञ्चो ऽन्वञ्चो मद्ध्ये ऽनिरुक्तः ।

(16)[P6] 7.4.2.3(14)– मद्ध्ये । अनिरुक्तः । भवति ।

मद्ध्ये ऽनिरुक्तो ऽनिरुक्तो मद्ध्ये मद्ध्ये ऽनिरुक्तो भवति भव त्यनिरुक्तो मद्ध्ये मद्ध्ये ऽनिरुक्तो भवति ।

(17)[P6] 7.4.2.3(15)– अनिरुक्तः । भवति । तेन ।

अनिरुक्तो भवति भव त्यनिरुक्तो ऽनिरुक्तो भवति तेन तेन भव त्यनिरुक्तो ऽनिरुक्तो भवति तेन ।

(18)[P6] 7.4.2.3(15)– अनिरुक्तः ।

अनिरुक्त इत्यनिः – उक्तः ।

(19)[P6] 7.4.2.3(16)– भवति । तेन । अजामि ।

भवति तेन तेन भवति भवति तेना जाम्य जामि तेन भवति भवति तेना जामि ।

(20)[P6] 7.4.2.3(17)- तेन । अजामि । ऊर्द्ध्वानि ।

तेना जाम्य जामि तेन तेना जाम्यूर्द्ध्वा न्यूर्द्ध्वा न्यजामि तेन तेना जाम्यूर्द्ध्वानि ।

(21)[P6] 7.4.2.3(18)- अजामि । ऊर्द्ध्वानि । पृष्ठानि ।

अजाम्यूर्द्ध्वा न्यूर्द्ध्वा न्यजा म्यजा म्यूर्द्ध्वानि पृष्ठानि पृष्ठा न्यूर्द्ध्वा न्यजा म्यजा म्यूर्द्ध्वानि पृष्ठानि ।

(22)[P6] 7.4.2.3(19)- ऊर्द्ध्वानि । पृष्ठानि । भवन्ति ।

ऊर्द्ध्वानि पृष्ठानि पृष्ठा न्यूर्द्ध्वा न्यूर्द्ध्वानि पृष्ठानि भवन्ति भवन्ति पृष्ठा न्यूर्द्ध्वा न्यूर्द्ध्वानि पृष्ठानि भवन्ति ।

(23)[P6] 7.4.2.3(20)- पृष्ठानि । भवन्ति । ऊर्द्ध्वाः ।

पृष्ठानि भवन्ति भवन्ति पृष्ठानि पृष्ठानि भव न्त्यूर्द्ध्वा ऊर्द्ध्वा भवन्ति पृष्ठानि पृष्ठानि भव न्त्यूर्द्ध्वाः ।

(24)[P6] 7.4.2.3(21)- भवन्ति । ऊर्द्ध्वाः । छन्दोमाः ।

भव न्त्यूर्द्ध्वा ऊर्द्ध्वा भवन्ति भव न्त्यूर्द्ध्वा श्छन्दोमा श्छन्दोमा ऊर्द्ध्वा भवन्ति भव न्त्यूर्द्ध्वा श्छन्दोमाः ।

(25)[P6] 7.4.2.3(22)- ऊर्द्ध्वाः । छन्दोमाः । उभाभ्याम् ।

ऊर्द्ध्वा श्छन्दोमा श्छन्दोमा ऊर्द्ध्वा ऊर्द्ध्वा श्छन्दोमा उभाभ्या मुभाभ्याम् छन्दोमा ऊर्द्ध्वा ऊर्द्ध्वा श्छन्दोमा उभाभ्याम् ।

(26)[P6] 7.4.2.3(23)- छन्दोमाः । उभाभ्याम् । रूपाभ्याम् ।

छन्दोमा उभाभ्या मुभाभ्याम् छन्दोमा श्छन्दोमा उभाभ्या(ग्म्) रूपाभ्या(ग्म्) रूपाभ्या मुभाभ्याम् छन्दोमा श्छन्दोमा उभाभ्या(ग्म्) रूपाभ्याम् ।

(27)[P6] 7.4.2.3(23)– छन्दोमाः ।

छन्दोमा इति छन्दः – माः ।

(28)[P6] 7.4.2.3(24)– उभाभ्याम् । रूपाभ्याम् । सुवर्गम् ।

उभाभ्या(ग्म्) रूपाभ्या(ग्म्) रूपाभ्या मुभाभ्या मुभाभ्या(ग्म्) रूपाभ्या(ग्म्) सुवर्ग(ग्म्) सुवर्ग(ग्म्) रूपाभ्या मुभाभ्या मुभाभ्या(ग्म्) रूपाभ्या(ग्म्) सुवर्गम् ।

(29)[P6] 7.4.2.3(25)– रूपाभ्याम् । सुवर्गम् । लोकम् ।

रूपाभ्या(ग्म्) सुवर्ग(ग्म्) सुवर्ग(ग्म्) रूपाभ्या(ग्म्) रूपाभ्या(ग्म्) सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) रूपाभ्या(ग्म्) रूपाभ्या(ग्म्) सुवर्गम् ँलोकम् ।

(30)[P6] 7.4.2.3(26)– सुवर्गम् । लोकम् । यन्ति ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकं ँयन्ति यन्ति लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकं ँयन्ति ।

(31)[P6] 7.4.2.3(26)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(32)[P6] 7.4.2.3(27)– लोकम् । यन्ति । असत्रम् ।

लोकं ँयन्ति यन्ति लोकम् ँलोकं ँयन्त्यसत्र मसत्रं ँयन्ति लोकम् ँलोकं ँयन्त्यसत्रम् ।

(33)[P6] 7.4.2.3(28)– यन्ति । असत्रम् । वै ।

यन्त्यसत्र मसत्रं ँयन्ति यन्त्यसत्रं ँवै वा असत्रं ँयन्ति यन्त्यसत्रं ँवै ।

(34)[P6] 7.4.2.3(29)– असत्रम् । वै । एतत् ।

असत्रं ँवै वा असत्र मसत्रं ँवा एत देतद् वा असत्र मसत्रं ँवा एतत् ।

(35)[P6] 7.4.2.3(30)– वै । एतत् । यत् ।

वा एत देतद् वै वा एतद् यद् यदेतद् वै वा एतद् यत् ।

(36)[P6] 7.4.2.3(31)- एतत् । यत् । अछन्दोमम् ।

एतद् यद् यदेत देतद् यदछन्दोम मछन्दोमं ँयदेत देतद् यदछन्दोमम् ।

(37)[P6] 7.4.2.3(32)- यत् । अछन्दोमम् । यत् ।

यदछन्दोम मछन्दोमं ँयद् यदछन्दोमं ँयद् यदछन्दोमं ँयद् यदछन्दोमं ँयत् ।

(38)[P6] 7.4.2.3(33)- अछन्दोमम् । यत् । छन्दोमाः ।

अछन्दोमं ँयद् यदछन्दोम मछन्दोमं ँयच् छन्दोमा श्छन्दोमा यदछन्दोम मछन्दोमं ँयच् छन्दोमाः ।

(39)[P6] 7.4.2.3(33)- अछन्दोमम् ।

अछन्दोममित्यछन्दः - मम् ।

(40)[P6] 7.4.2.3(34)- यत् । छन्दोमाः । भवन्ति ।

यच् छन्दोमा श्छन्दोमा यद् यच् छन्दोमा भवन्ति भवन्ति छन्दोमा यद् यच् छन्दोमा भवन्ति ।

(41)[P6] 7.4.2.3(35)- छन्दोमाः । भवन्ति । तेन ।

छन्दोमा भवन्ति भवन्ति छन्दोमा श्छन्दोमा भवन्ति तेन तेन भवन्ति छन्दोमा श्छन्दोमा भवन्ति तेन ।

(42)[P6] 7.4.2.3(35)- छन्दोमाः ।

छन्दोमा इति छन्दः - माः ।

(43)[P6] 7.4.2.3(36)- भवन्ति । तेन । सत्रम् ।

भवन्ति तेन तेन भवन्ति भवन्ति तेन सत्र(गम्) सत्रम् तेन भवन्ति भवन्ति तेन सत्रम् ।

(44)[P6] 7.4.2.3(37)- तेन । सत्रम् । देवताः ।

तेन सत्र(गम्) सत्रम् तेन तेन सत्रम् देवता देवताः सत्रम् तेन तेन सत्रम् देवताः ।

(45)[P6] 7.4.2.3(38)– सत्रम् । देवताः । एव ।

सत्रम् देवता देवताः सत्र(ग्म्) सत्रम् देवता एवैव देवताः सत्र(ग्म्) सत्रम् देवता एव ।

(46)[P6] 7.4.2.3(39)– देवताः । एव । पृष्ठैः ।

देवता एवैव देवता देवता एव पृष्ठैः पृष्ठै रेव देवता देवता एव पृष्ठैः ।

(47)[P6] 7.4.2.3(40)– एव । पृष्ठैः । अव ।

एव पृष्ठैः पृष्ठै रेवैव पृष्ठै रवाव पृष्ठै रेवैव पृष्ठै रव ।

(48)[P6] 7.4.2.3(41)– पृष्ठैः । अव । रुन्धते ।

पृष्ठै रवाव पृष्ठैः पृष्ठै रव रुन्धते रुन्धते ऽव पृष्ठैः पृष्ठै रव रुन्धते ।

(49)[P6] 7.4.2.3(42)– अव । रुन्धते । पशून् ।

अव रुन्धते रुन्धते ऽवाव रुन्धते पशून् पशून् रुन्धते ऽवाव रुन्धते पशून् ।

(50)[P6] 7.4.2.3(43)– रुन्धते । पशून् । छन्दोमैः ।

रुन्धते पशून् पशून् रुन्धते रुन्धते पशून् छन्दोमै श्छन्दोमैः पशून् रुन्धते रुन्धते पशून् छन्दोमैः ।

(51)[P6] 7.4.2.3(44)– पशून् । छन्दोमैः । ओजः ।

पशून् छन्दोमै श्छन्दोमैः पशून् पशून् छन्दोमै रोज ओज श्छन्दोमैः पशून् पशून् छन्दोमै रोजः ।

(52)[P6] 7.4.2.3(45)– छन्दोमैः । ओजः । वै ।

छन्दोमै रोज ओज श्छन्दोमै श्छन्दोमै रोजो वै वा ओज श्छन्दोमै श्छन्दोमै रोजो वै ।

(53)[P6] 7.4.2.3(45)– छन्दोमैः ।

छन्दोमैरिति छन्दः – मैः ।

(54)[P6] 7.4.2.3(46)- ओजः । वै । वीर्यम् ।

ओजो वै वा ओज ओजो वै वीर्यं वीर्यं वा ओज ओजो वै वीर्यम् ।

(55)[P6] 7.4.2.3(47)- वै । वीर्यम् । पृष्ठानि ।

वै वीर्यं वीर्यं वै वै वीर्यम् पृष्ठानि पृष्ठानि वीर्यं वै वै वीर्यम् पृष्ठानि ।

(56)[P6] 7.4.2.3(48)- वीर्यम् । पृष्ठानि । पशवः ।

वीर्यम् पृष्ठानि पृष्ठानि वीर्यं वीर्यम् पृष्ठानि पशवः पशवः पृष्ठानि वीर्यं वीर्यम् पृष्ठानि पशवः ।

(57)[P6] 7.4.2.3(49)- पृष्ठानि । पशवः । छन्दोमाः ।

पृष्ठानि पशवः पशवः पृष्ठानि पृष्ठानि पशव श्छन्दोमा श्छन्दोमाः पशवः पृष्ठानि पृष्ठानि पशव श्छन्दोमाः ।

(58)[P6] 7.4.2.3(50)- पशवः । छन्दोमाः । ओजसि ।

पशव श्छन्दोमा श्छन्दोमाः पशवः पशव श्छन्दोमा ओज स्योजसि छन्दोमाः पशवः पशव श्छन्दोमा ओजसि ।

(1)[P7] 7.4.2.4(1)- छन्दोमाः । ओजसि । एव ।

छन्दोमा ओज स्योजसि छन्दोमा श्छन्दोमा ओज स्येवैवौजसि छन्दोमा श्छन्दोमा ओज स्येव ।

(2)[P7] 7.4.2.4(1)- छन्दोमाः ।

छन्दोमा इति छन्दः - माः ।

(3)[P7] 7.4.2.4(2)- ओजसि । एव । वीर्ये ।

ओज स्येवैवौज स्योज स्येव वीर्ये वीर्य एवौज स्योज स्येव वीर्ये ।

(4)[P7] 7.4.2.4(3)– एव । वीर्ये । पशुषु ।

एव वीर्ये वीर्य एवैव वीर्ये पशुषु पशुषु वीर्य एवैव वीर्ये पशुषु ।

(5)[P7] 7.4.2.4(4)– वीर्ये । पशुषु । प्रति ।

वीर्ये पशुषु पशुषु वीर्ये वीर्ये पशुषु प्रति प्रति पशुषु वीर्ये वीर्ये पशुषु प्रति ।

(6)[P7] 7.4.2.4(5)– पशुषु । प्रति । तिष्ठन्ति ।

पशुषु प्रति प्रति पशुषु पशुषु प्रति तिष्ठन्ति तिष्ठन्ति प्रति पशुषु पशुषु प्रति तिष्ठन्ति ।

(7)[P7] 7.4.2.4(6)– प्रति । तिष्ठन्ति । त्रयः ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्ति त्रय स्त्रय स्तिष्ठन्ति प्रति प्रति तिष्ठन्ति त्रयः ।

(8)[P7] 7.4.2.4(7)– तिष्ठन्ति । त्रयः । त्रयस्त्रि(ग्म्)शाः ।

तिष्ठन्ति त्रय स्त्रय स्तिष्ठन्ति तिष्ठन्ति त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रय स्तिष्ठन्ति तिष्ठन्ति त्रय स्त्रयस्त्रि(ग्म्)शाः ।

(9)[P7] 7.4.2.4(8)– त्रयः । त्रयस्त्रि(ग्म्)शाः । अवस्तात् ।

त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शा अवस्ता दवस्तात् त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शा अवस्तात् ।

(10)[P7] 7.4.2.4(9)– त्रयस्त्रि(ग्म्)शाः । अवस्तात् । भवन्ति ।

त्रयस्त्रि(ग्म्)शा अवस्ता दवस्तात् त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा अवस्ताद् भवन्ति भव न्त्यवस्तात् त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा अवस्ताद् भवन्ति ।

(11)[P7] 7.4.2.4(9)– त्रयस्त्रि(ग्म्)शाः ।

त्रयस्त्रि(ग्म्)शा इति त्रयः – त्रि(ग्म्)शाः ।

(12)[P7] 7.4.2.4(10)- अवस्तात् । भवन्ति । त्रयः ।

अवस्ताद् भवन्ति भव न्त्यवस्ता दवस्ताद् भवन्ति त्रय स्त्रयो भव न्त्यवस्ता दवस्ताद् भवन्ति त्रयः ।

(13)[P7] 7.4.2.4(11)- भवन्ति । त्रयः । त्रयस्त्रि(ग्म्)शाः ।

भवन्ति त्रय स्त्रयो भवन्ति भवन्ति त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रयो भवन्ति भवन्ति त्रय स्त्रयस्त्रि(ग्म्)शाः ।

(14)[P7] 7.4.2.4(12)- त्रयः । त्रयस्त्रि(ग्म्)शाः । परस्तात् ।

त्रय स्त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शाः परस्तात् परस्तात् त्रयस्त्रि(ग्म्)शा स्त्रय स्त्रय स्त्रयस्त्रि(ग्म्)शाः परस्तात् ।

(15)[P7] 7.4.2.4(13)- त्रयस्त्रि(ग्म्)शाः । परस्तात् । मद्ध्ये ।

त्रयस्त्रि(ग्म्)शाः परस्तात् परस्तात् त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शाः परस्तान् मद्ध्ये मद्ध्ये परस्तात् त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शाः परस्तान् मद्ध्ये ।

(16)[P7] 7.4.2.4(13)- त्रयस्त्रि(ग्म्)शाः ।

त्रयस्त्रि(ग्म्)शा इति त्रयः - त्रि(ग्म्)शाः ।

(17)[P7] 7.4.2.4(14)- परस्तात् । मद्ध्ये । पृष्ठानि ।

परस्तान् मद्ध्ये मद्ध्ये परस्तात् परस्तान् मद्ध्ये पृष्ठानि पृष्ठानि मद्ध्ये परस्तात् परस्तान् मद्ध्ये पृष्ठानि ।

(18)[P7] 7.4.2.4(15)- मद्ध्ये । पृष्ठानि । उरः ।

मद्ध्ये पृष्ठानि पृष्ठानि मद्ध्ये मद्ध्ये पृष्ठा न्युर उरः पृष्ठानि मद्ध्ये मद्ध्ये पृष्ठा न्युरः ।

(19)[P7] 7.4.2.4(16)- पृष्ठानि । उरः । वै ।

पृष्ठा न्युर उरः पृष्ठानि पृष्ठा न्युरो वै वा उरः पृष्ठानि पृष्ठा न्युरो वै ।

(20)[P7] 7.4.2.4(17)– उरः । वै । त्रयस्त्रि(ग्म्)शाः ।

उरो वै वा उर उरो वै त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा वा उर उरो वै त्रयस्त्रि(ग्म्)शाः ।

(21)[P7] 7.4.2.4(18)– वै । त्रयस्त्रि(ग्म्)शाः । आत्मा ।

वै त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा वै वै त्रयस्त्रि(ग्म्)शा आत्मा ऽऽत्मा त्रयस्त्रि(ग्म्)शा वै वै त्रयस्त्रि(ग्म्)शा आत्मा ।

(22)[P7] 7.4.2.4(19)– त्रयस्त्रि(ग्म्)शाः । आत्मा । पृष्ठानि ।

त्रयस्त्रि(ग्म्)शा आत्मा ऽऽत्मा त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा आत्मा पृष्ठानि पृष्ठा न्यात्मा त्रयस्त्रि(ग्म्)शा स्त्रयस्त्रि(ग्म्)शा आत्मा पृष्ठानि ।

(23)[P7] 7.4.2.4(19)– त्रयस्त्रि(ग्म्)शाः ।

त्रयस्त्रि(ग्म्)शा इति त्रयः – त्रि(ग्म्)शाः ।

(24)[P7] 7.4.2.4(20)– आत्मा । पृष्ठानि । आत्मने ।

आत्मा पृष्ठानि पृष्ठा न्यात्मा ऽऽत्मा पृष्ठा न्यात्मन आत्मने पृष्ठा न्यात्मा ऽऽत्मा पृष्ठा न्यात्मने ।

(25)[P7] 7.4.2.4(21)– पृष्ठानि । आत्मने । एव ।

पृष्ठा न्यात्मन आत्मने पृष्ठानि पृष्ठा न्यात्मन एवै वात्मने पृष्ठानि पृष्ठा न्यात्मन एव ।

(26)[P7] 7.4.2.4(22)– आत्मने । एव । तत् ।

आत्मन एवै वात्मन आत्मन एव तत् तदेवात्मन आत्मन एव तत् ।

(27)[P7] 7.4.2.4(23)– एव । तत् । यजमानाः ।

एव तत् तदेवैव तद् यजमाना यजमाना स्तदेवैव तद् यजमानाः ।

(28)[P7] 7.4.2.4(24)– तत् । यजमानाः । शर्म ।

तद् यजमाना यजमाना स्तत् तद् यजमानाः शर्म शर्म यजमाना स्तत् तद् यजमानाः शर्म ।

(29)[P7] 7.4.2.4(25)– यजमानाः । शर्म । नह्यन्ते ।

यजमानाः शर्म शर्म यजमाना यजमानाः शर्म नह्यन्ते नह्यन्ते शर्म यजमाना यजमानाः शर्म नह्यन्ते ।

(30)[P7] 7.4.2.4(26)– शर्म । नह्यन्ते । अनार्त्यै ।

शर्म नह्यन्ते नह्यन्ते शर्म शर्म नह्यन्ते ऽनार्त्या अनार्त्यै नह्यन्ते शर्म शर्म नह्यन्ते ऽनार्त्यै ।

(31)[P7] 7.4.2.4(27)– नह्यन्ते । अनार्त्यै । बृहद्रथन्तराभ्याम् ।

नह्यन्ते ऽनार्त्या अनार्त्यै नह्यन्ते नह्यन्ते ऽनार्त्यै बृहद्रथन्तराभ्याम् बृहद्रथन्तराभ्या मनार्त्यै नह्यन्ते नह्यन्ते ऽनार्त्यै बृहद्रथन्तराभ्याम् ।

(32)[P7] 7.4.2.4(28)– अनार्त्यै । बृहद्रथन्तराभ्याम् । यन्ति ।

अनार्त्यै बृहद्रथन्तराभ्याम् बृहद्रथन्तराभ्या मनार्त्या अनार्त्यै बृहद्रथन्तराभ्यां ँयन्ति यन्ति बृहद्रथन्तराभ्या मनार्त्या अनार्त्यै बृहद्रथन्तराभ्यां ँयन्ति ।

(33)[P7] 7.4.2.4(29)– बृहद्रथन्तराभ्याम् । यन्ति । इयम् ।

बृहद्रथन्तराभ्यां ँयन्ति यन्ति बृहद्रथन्तराभ्याम् बृहद्रथन्तराभ्यां ँयन्तीय मियं ँयन्ति बृहद्रथन्तराभ्याम् बृहद्रथन्तराभ्यां ँयन्तीयम् ।

(34)[P7] 7.4.2.4(29)– बृहद्रथन्तराभ्याम् ।

बृहद्रथन्तराभ्यामिति बृहत् – रथन्तराभ्याम् ।

(35)[P7] 7.4.2.4(30)– यन्ति । इयम् । वाव ।

यन्तीय मियं ँयन्ति यन्तीयं ँवाव वावेयं ँयन्ति यन्तीयं ँवाव ।

(36)[P7] 7.4.2.4(31)– इयम् । वाव । रथन्तरम् ।

इयं ँवाव वावेय मियं ँवाव रथन्तर(ग्म्) रथन्तरं ँवावेय मियं ँवाव रथन्तरम् ।

(37)[P7] 7.4.2.4(32)– वाव । रथन्तरम् । असौ ।

वाव रथन्तर(ग्म्) रथन्तरं ँवाव वाव रथन्तर मसा वसौ रथन्तरं ँवाव वाव रथन्तर मसौ ।

(38)[P7] 7.4.2.4(33)– रथन्तरम् । असौ । बृहत् ।

रथन्तर मसा वसौ रथन्तर(ग्म्) रथन्तर मसौ बृहद् बृह दसौ रथन्तर(ग्म्) रथन्तर मसौ बृहत् ।

(39)[P7] 7.4.2.4(33)– रथन्तरम् ।

रथन्तरमिति रथं – तरम् ।

(40)[P7] 7.4.2.4(34)– असौ । बृहत् । आभ्याम् ।

असौ बृहद् बृह दसा वसौ बृह दाभ्या माभ्याम् बृह दसा वसौ बृह दाभ्याम् ।

(41)[P7] 7.4.2.4(35)– बृहत् । आभ्याम् । एव ।

बृह दाभ्या माभ्याम् बृहद् बृह दाभ्या मेवै वाभ्याम् बृहद् बृह दाभ्या मेव ।

(42)[P7] 7.4.2.4(36)– आभ्याम् । एव । यन्ति ।

आभ्या मेवै वाभ्या माभ्या मेव यन्ति यन्त्येवाभ्या माभ्या मेव यन्ति ।

(43)[P7] 7.4.2.4(37)– एव । यन्ति । अथो ।

एव यन्ति यन्त्येवैव यन्त्यथो अथो यन्त्येवैव यन्त्यथो ।

(44)[P7] 7.4.2.4(38)– यन्ति । अथो । अनयोः ।

यन्त्यथो अथो यन्ति यन्त्यथो अनयो रनयो रथो यन्ति यन्त्यथो अनयोः ।

(45)[P7] 7.4.2.4(39)– अथो । अनयोः । एव ।

अथो अनयो रनयो रथो अथो अनयो रेवै वानयो रथो अथो अनयोरेव ।

(46)[P7] 7.4.2.4(39)– अथो ।

अथो इत्यथो ।

(47)[P7] 7.4.2.4(40)- अनयोः । एव । प्रति ।

अनयो रेवै वानयो रनयो रेव प्रति प्रत्ये वानयो रनयो रेव प्रति ।

(48)[P7] 7.4.2.4(41)- एव । प्रति । तिष्ठन्ति ।

एव प्रति प्रत्येवैव प्रति तिष्ठन्ति तिष्ठन्ति प्रत्येवैव प्रति तिष्ठन्ति ।

(49)[P7] 7.4.2.4(42)- प्रति । तिष्ठन्ति । एते ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्त्येते एते तिष्ठन्ति प्रति प्रति तिष्ठन्त्येते ।

(50)[P7] 7.4.2.4(43)- तिष्ठन्ति । एते । वै ।

तिष्ठ न्त्येते एते तिष्ठन्ति तिष्ठ न्त्येते वै वा एते तिष्ठन्ति तिष्ठ न्त्येते वै ।

(51)[P7] 7.4.2.4(44)- एते । वै । यज्ञस्य ।

एते वै वा एते एते वै यज्ञस्य यज्ञस्य वा एते एते वै यज्ञस्य ।

(52)[P7] 7.4.2.4(44)- एते ।

एते इत्येते ।

(53)[P7] 7.4.2.4(45)- वै । यज्ञस्य । अञ्जसायनी ।

वै यज्ञस्य यज्ञस्य वै वै यज्ञस्या ञ्जसायनी अञ्जसायनी यज्ञस्य वै वै यज्ञस्या ञ्जसायनी ।

(54)[P7] 7.4.2.4(46)- यज्ञस्य । अञ्जसायनी । स्रुती ।

यज्ञस्या ञ्जसायनी अञ्जसायनी यज्ञस्य यज्ञस्या ञ्जसायनी स्रुती स्रुती अञ्जसायनी यज्ञस्य यज्ञस्या ञ्जसायनी स्रुती ।

(55)[P7] 7.4.2.4(47)- अञ्जसायनी । स्रुती । ताभ्याम् ।

अञ्जसायनी स्रुती स्रुती अञ्जसायनी अञ्जसायनी स्रुती ताभ्याम् ताभ्या(गग्) स्रुती अञ्जसायनी अञ्जसायनी स्रुती ताभ्याम् ।

(56)[P7] 7.4.2.4(47)- अञ्जसायनी ।

अञ्जसायनी इत्यञ्जसा - अयनी ।

(57)[P7] 7.4.2.4(48)- स्रुती । ताभ्याम् । एव ।

स्रुती ताभ्याम् ताभ्या(गं॒) स्रुती स्रुती ताभ्या मेवैव ताभ्या(गं॒) स्रुती स्रुती ताभ्या मेव ।

(58)[P7] 7.4.2.4(48)- स्रुती ।

स्रुती इति स्रुती ।

(59)[P7] 7.4.2.4(49)- ताभ्याम् । एव । सुवर्गम् ।

ताभ्या मेवैव ताभ्याम् ताभ्या मेव सुवर्ग(गम्) सुवर्ग मेव ताभ्याम् ताभ्या मेव सुवर्गम् ।

(60)[P7] 7.4.2.4(50)- एव । सुवर्गम् । लोकम् ।

एव सुवर्ग(गम्) सुवर्ग मेवैव सुवर्गम् ँल्लोकम् ँल्लोक(गम्) सुवर्ग मेवैव सुवर्गम् ँल्लोकम् ।

(1)[P8] 7.4.2.5(1)- सुवर्गम् । लोकम् । यन्ति ।

सुवर्गम् ँल्लोकम् ँल्लोक(गम्) सुवर्ग(गम्) सुवर्गम् ँल्लोकं ँयन्ति यन्ति लोक(गम्) सुवर्ग(गम्) सुवर्गम् ँल्लोकं ँयन्ति ।

(2)[P8] 7.4.2.5(1)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

(3)[P8] 7.4.2.5(2)- लोकम् । यन्ति । पराञ्चः ।

लोकं ँयन्ति यन्ति लोकम् ँल्लोकं ँयन्ति पराञ्चः पराञ्चो यन्ति लोकम् ँल्लोकं ँयन्ति पराञ्चः ।

(4)[P8] 7.4.2.5(3)- यन्ति । पराञ्चः । वै ।

यन्ति पराञ्चः पराञ्चो यन्ति यन्ति पराञ्चो वै वै पराञ्चो यन्ति यन्ति पराञ्चो वै ।

(5)[P8] 7.4.2.5(4)- पराञ्चः । वै । एते ।

पराञ्चो वै वै पराञ्चः पराञ्चो वा एत एते वै पराञ्चः पराञ्चो वा एते ।

(6)[P8] 7.4.2.5(5)- वै । एते । सुवर्गम् ।

वा एत एते वै वा एते सुवर्ग(ग्म्) सुवर्ग मेते वै वा एते सुवर्गम् ।

(7)[P8] 7.4.2.5(6)- एते । सुवर्गम् । लोकम् ।

एते सुवर्ग(ग्म्) सुवर्ग मेत एते सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग मेत एते सुवर्गम् ँलोकम् ।

(8)[P8] 7.4.2.5(7)- सुवर्गम् । लोकम् । अभ्यारोहन्ति ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मभ्यारोह न्त्यभ्यारोहन्ति लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मभ्यारोहन्ति ।

(9)[P8] 7.4.2.5(7)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

(10)[P8] 7.4.2.5(8)- लोकम् । अभ्यारोहन्ति । ये ।

लोक मभ्यारोह न्त्यभ्यारोहन्ति लोकम् ँलोक मभ्यारोहन्ति ये ये ऽभ्यारोहन्ति लोकम् ँलोक मभ्यारोहन्ति ये ।

(11)[P8] 7.4.2.5(9)- अभ्यारोहन्ति । ये । पराचीनानि ।

अभ्यारोहन्ति ये ये ऽभ्यारोह न्त्यभ्यारोहन्ति ये पराचीनानि पराचीनानि ये ऽभ्यारोह न्त्यभ्यारोहन्ति ये पराचीनानि ।

(12)[P8] 7.4.2.5(9)- अभ्यारोहन्ति ।

अभ्यारोहन्तीत्यभि - आरोहन्ति ।

(13)[P8] 7.4.2.5(10)– ये । पराचीनानि । पृष्ठानि ।

ये पराचीनानि पराचीनानि ये ये पराचीनानि पृष्ठानि पृष्ठानि पराचीनानि ये ये पराचीनानि पृष्ठानि ।

(14)[P8] 7.4.2.5(11)– पराचीनानि । पृष्ठानि । उपयन्ति ।

पराचीनानि पृष्ठानि पृष्ठानि पराचीनानि पराचीनानि पृष्ठा न्युपय न्त्युपयन्ति पृष्ठानि पराचीनानि पराचीनानि पृष्ठा न्युपयन्ति ।

(15)[P8] 7.4.2.5(12)– पृष्ठानि । उपयन्ति । प्रत्यङ् ।

पृष्ठा न्युपय न्त्युपयन्ति पृष्ठानि पृष्ठा न्युपयन्ति प्रत्यङ् प्रत्यङ् ङुपयन्ति पृष्ठानि पृष्ठा न्युपयन्ति प्रत्यङ् ।

(16)[P8] 7.4.2.5(13)– उपयन्ति । प्रत्यङ् । षडहः ।

उपयन्ति प्रत्यङ् प्रत्यङ् ङुपय न्त्युपयन्ति प्रत्यङ् ख्षडह ष्षडहः प्रत्यङ् ङुपय न्त्युपयन्ति प्रत्यङ् ख्षडहः ।

(17)[P8] 7.4.2.5(13)– उपयन्ति ।

उपयन्तीत्युप – यन्ति ।

(18)[P8] 7.4.2.5(14)– प्रत्यङ् । षडहः । भवति ।

प्रत्यङ् ख्षडह ष्षडहः प्रत्यङ् प्रत्यङ् ख्षडहो भवति भवति षडहः प्रत्यङ् प्रत्यङ् ख्षडहो भवति ।

(19)[P8] 7.4.2.5(15)– षडहः । भवति । प्रत्यवरूढ्यै ।

षडहो भवति भवति षडह ष्षडहो भवति प्रत्यवरूढ्यै प्रत्यवरूढ्यै भवति षडह ष्षडहो भवति प्रत्यवरूढ्यै ।

(20)[P8] 7.4.2.5(15)- षडहः ।

षडह इति षट् - अहः ।

(21)[P8] 7.4.2.5(16)- भवति । प्रत्यवरूढ्यै । अथो ।

भवति प्रत्यवरूढ्यै प्रत्यवरूढ्यै भवति भवति प्रत्यवरूढ्या अथो अथो प्रत्यवरूढ्यै भवति भवति प्रत्यवरूढ्या अथो ।

(22)[P8] 7.4.2.5(17)- प्रत्यवरूढ्यै । अथो । प्रतिष्ठित्यै ।

प्रत्यवरूढ्या अथो अथो प्रत्यवरूढ्यै प्रत्यवरूढ्या अथो प्रतिष्ठित्यै प्रतिष्ठित्या अथो प्रत्यवरूढ्यै प्रत्यवरूढ्या अथो प्रतिष्ठित्यै ।

(23)[P8] 7.4.2.5(17)- प्रत्यवरूढ्यै ।

प्रत्यवरूढ्या इति प्रति - अवरूढ्यै ।

(24)[P8] 7.4.2.5(18)- अथो । प्रतिष्ठित्यै । उभयोः ।

अथो प्रतिष्ठित्यै प्रतिष्ठित्या अथो अथो प्रतिष्ठित्या उभयो रुभयोः प्रतिष्ठित्या अथो अथो प्रतिष्ठित्या उभयोः ।

(25)[P8] 7.4.2.5(18)- अथो ।

अथो इत्यथो ।

(26)[P8] 7.4.2.5(19)- प्रतिष्ठित्यै । उभयोः । लोकयोः ।

प्रतिष्ठित्या उभयो रुभयोः प्रतिष्ठित्यै प्रतिष्ठित्या उभयोर् लोकयोर् लोकयो रुभयोः प्रतिष्ठित्यै प्रतिष्ठित्या उभयोर् लोकयोः ।

(27)[P8] 7.4.2.5(19)- प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति - स्थित्यै ।

(28)[P8] 7.4.2.5(20)– उ॒भयोः᳚ । लो॒कयोः᳚ । ऋ॒द्ध्वा ।

उ॒भयो᳚र् लो॒कयो᳚र् लो॒कयो॑ रु॒भयो॑ रु॒भयो᳚र् लो॒कयो॑र्. ऋ॒द्ध्व र्द्ध्वा लो॒कयो॑ रु॒भयो॑ रु॒भयो᳚र् लो॒कयो॑र्. ऋ॒द्ध्वा ।

(29)[P8] 7.4.2.5(21)– लो॒कयोः᳚ । ऋ॒द्ध्वा । उत् ।

लो॒कयो॑र्. ऋ॒द्ध्व र्द्ध्वा लो॒कयो᳚र् लो॒कयो॑र्. ऋ॒द्ध्वो दु॒दृ॒द्ध्वा लो॒कयो᳚र् लो॒कयो॑र्. ऋ॒द्ध्वोत् ।

(30)[P8] 7.4.2.5(22)– ऋ॒द्ध्वा । उत् । ति॒ष्ठ॒न्ति॒ ।

ऋ॒द्ध्वो दु॒दृ॒द्ध्व र्द्ध्वोत् ति॑ष्ठन्ति ति॒ष्ठ॒ न्त्यु॒दृ॒द्ध्व र्द्ध्वोत् ति॑ष्ठन्ति ।

(31)[P8] 7.4.2.5(23)– उत् । ति॒ष्ठ॒न्ति॒ । त्रि॒वृतः॑ ।

उत् ति॑ष्ठन्ति ति॒ष्ठ॒ न्त्युदुत् ति॑ष्ठन्ति त्रि॒वृत॑ स्त्रि॒वृत॑ स्तिष्ठ॒ न्त्युदुत् ति॑ष्ठन्ति त्रि॒वृतः॑ ।

(32)[P8] 7.4.2.5(24)– ति॒ष्ठ॒न्ति॒ । त्रि॒वृतः॑ । अधि॑ ।

ति॒ष्ठ॒न्ति॒ त्रि॒वृत॑ स्त्रि॒वृत॑ स्तिष्ठन्ति तिष्ठन्ति त्रि॒वृतो ऽध्यधि॑ त्रि॒वृत॑ स्तिष्ठन्ति तिष्ठन्ति त्रि॒वृतो ऽधि॑ ।

(33)[P8] 7.4.2.5(25)– त्रि॒वृतः॑ । अधि॑ । त्रि॒वृत᳚म् ।

त्रि॒वृतो ऽध्यधि॑ त्रि॒वृत॑ स्त्रि॒वृतो ऽधि॑ त्रि॒वृत॑म् त्रि॒वृ॒त मधि॑ त्रि॒वृत॑ स्त्रि॒वृतो ऽधि॑ त्रि॒वृत᳚म् ।

(34)[P8] 7.4.2.5(25)– त्रि॒वृतः॑ ।

त्रि॒वृ॒त इति॑ त्रि – वृतः॑ ।

(35)[P8] 7.4.2.5(26)– अधि॑ । त्रि॒वृत᳚म् । उप॑ ।

अधि॑ त्रि॒वृत॑म् त्रि॒वृ॒त मध्यधि॑ त्रि॒वृ॒त मुपोप॑ त्रि॒वृ॒त मध्यधि॑ त्रि॒वृ॒त मुप॑ ।

(36)[P8] 7.4.2.5(27)– त्रि॒वृत᳚म् । उप॑ । य॒न्ति॒ ।

त्रि॒वृ॒त मुपोप॑ त्रि॒वृत॑म् त्रि॒वृ॒त मुप॑ यन्ति य॒न्त्युप॑ त्रि॒वृत॑म् त्रि॒वृ॒त मुप॑ यन्ति ।

(37)[P8] 7.4.2.5(27)- त्रिवृतम् ।

त्रिवृतमिति त्रि - वृतम् ।

(38)[P8] 7.4.2.5(28)- उप । यन्ति । स्तोमानाम् ।

उप यन्ति यन्त्युपोप यन्ति स्तोमाना(गग्) स्तोमानां ँयन्त्युपोप यन्ति स्तोमानाम् ।

(39)[P8] 7.4.2.5(29)- यन्ति । स्तोमानाम् । संपत्त्यै ।

यन्ति स्तोमाना(गग्) स्तोमानां ँयन्ति यन्ति स्तोमाना(ग्म्) संपत्त्यै संपत्त्यै स्तोमानां ँयन्ति यन्ति स्तोमाना(ग्म्) संपत्त्यै ।

(40)[P8] 7.4.2.5(30)- स्तोमानाम् । संपत्त्यै । प्रभवाय ।

स्तोमाना(ग्म्) संपत्त्यै संपत्त्यै स्तोमाना(गग्) स्तोमाना(ग्म्) संपत्त्यै प्रभवाय प्रभवाय संपत्त्यै स्तोमाना(गग्) स्तोमाना(ग्म्) संपत्त्यै प्रभवाय ।

(41)[P8] 7.4.2.5(31)- संपत्त्यै । प्रभवाय । ज्योतिः ।

संपत्त्यै प्रभवाय प्रभवाय संपत्त्यै संपत्त्यै प्रभवाय ज्योतिर् ज्योतिः प्रभवाय संपत्त्यै संपत्त्यै प्रभवाय ज्योतिः ।

(42)[P8] 7.4.2.5(31)- संपत्त्यै ।

संपत्त्या इति सं - पत्त्यै ।

(43)[P8] 7.4.2.5(32)- प्रभवाय । ज्योतिः । अग्निष्टोमः ।

प्रभवाय ज्योतिर् ज्योतिः प्रभवाय प्रभवाय ज्योति रग्निष्टोमो ऽग्निष्टोमो ज्योतिः प्रभवाय प्रभवाय ज्योति रग्निष्टोमः ।

(44)[P8] 7.4.2.5(32)- प्रभवाय ।

प्रभवायेति प्र - भवाय ।

(45)[P8] 7.4.2.5(33)– ज्योतिः । अग्निष्टोमः । भवति ।

ज्योति रग्निष्टोमो ऽग्निष्टोमो ज्योतिर् ज्योति रग्निष्टोमो भवति भव त्यग्निष्टोमो ज्योतिर् ज्योति रग्निष्टोमो भवति ।

(46)[P8] 7.4.2.5(34)– अग्निष्टोमः । भवति । अयम् ।

अग्निष्टोमो भवति भव त्यग्निष्टोमो ऽग्निष्टोमो भव त्यय मयम् भव त्यग्निष्टोमो ऽग्निष्टोमो भव त्ययम् ।

(47)[P8] 7.4.2.5(34)– अग्निष्टोमः ।

अग्निष्टोम इत्यग्नि – स्तोमः ।

(48)[P8] 7.4.2.5(35)– भवति । अयम् । वाव ।

भव त्यय मयम् भवति भव त्ययं ँवाव वावायम् भवति भव त्ययं ँवाव ।

(49)[P8] 7.4.2.5(36)– अयम् । वाव । सः । (GS–7.4–02)

अयं ँवाव वावाय मयं ँवाव स स वावाय मयं ँवाव सः ।

(50)[P8] 7.4.2.5(37)– वाव । सः । क्षयः । (GS–7.4–02)

वाव स स वाव वाव स क्षयः क्षयः स वाव वाव स क्षयः ।

(51)[P8] 7.4.2.5(38)– सः । क्षयः । अस्मात् । (GS–7.4–02)

स क्षयः क्षयः स स क्षयो ऽस्मा दस्मात् क्षयः स स क्षयो ऽस्मात् ।

(52)[P8] 7.4.2.5(39)– क्षयः । अस्मात् । एव । (GS–7.4–02)

क्षयो ऽस्मा दस्मात् क्षयः क्षयो ऽस्मा देवै वास्मात् क्षयः क्षयो ऽस्मा देव ।

(53)[P8] 7.4.2.5(40)– अस्मात् । एव । तेन । (GS–7.4–02)

अस्मा देवै वास्मा दस्मा देव तेन तेनैवास्मा दस्मा देव तेन ।

(54)[P8] 7.4.2.5(41)- एव । तेन । क्षयात् । (GS-7.4-02)

एव तेन तेनैवैव तेन क्षयात् क्षयात् तेनैवैव तेन क्षयात् ।

(55)[P8] 7.4.2.5(42)- तेन । क्षयात् । न । (GS-7.4-02)

तेन क्षयात् क्षयात् तेन तेन क्षयान् न न क्षयात् तेन तेन क्षयान् न ।

(56)[P8] 7.4.2.5(43)- क्षयात् । न । यन्ति ।

क्षयान् न न क्षयात् क्षयान् न यन्ति यन्ति न क्षयात् क्षयान् न यन्ति ।

(57)[P8] 7.4.2.5(44)- न । यन्ति । चतुर्वि(ग्म्)शतिरात्रः ।

न यन्ति यन्ति न न यन्ति चतुर्वि(ग्म्)शतिरात्र श्चतुर्वि(ग्म्)शतिरात्रो यन्ति न न यन्ति चतुर्वि(ग्म्)शतिरात्रः ।

(58)[P8] 7.4.2.5(45)- यन्ति । चतुर्वि(ग्म्)शतिरात्रः । भवति ।

यन्ति चतुर्वि(ग्म्)शतिरात्र श्चतुर्वि(ग्म्)शतिरात्रो यन्ति यन्ति चतुर्वि(ग्म्)शतिरात्रो भवति भवति चतुर्वि(ग्म्)शतिरात्रो यन्ति यन्ति चतुर्वि(ग्म्)शतिरात्रो भवति ।

(59)[P8] 7.4.2.5(46)- चतुर्वि(ग्म्)शतिरात्रः । भवति । चतुर्वि(ग्म्)शतिः ।

चतुर्वि(ग्म्)शतिरात्रो भवति भवति चतुर्वि(ग्म्)शतिरात्र श्चतुर्वि(ग्म्)शतिरात्रो भवति चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिर् भवति चतुर्वि(ग्म्)शतिरात्र श्चतुर्वि(ग्म्)शतिरात्रो भवति चतुर्वि(ग्म्)शतिः ।

(60)[P8] 7.4.2.5(46)- चतुर्वि(ग्म्)शतिरात्रः ।

चतुर्वि(ग्म्)शतिरात्र इति चतुर्वि(ग्म्)शति - रात्रः ।

(61)[P8] 7.4.2.5(47)- भवति । चतुर्वि(ग्म्)शतिः । अर्द्धमासाः ।

भवति चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिर् भवति भवति चतुर्वि(ग्म्)शति रर्द्धमासा अर्द्धमासा श्चतुर्वि(ग्म्)शतिर् भवति भवति चतुर्वि(ग्म्)शति रर्द्धमासाः ।

(62)[P8] 7.4.2.5(48)– चतुर्वि(ग्म्)शतिः । अर्द्धमासाः । सँवथ्सरः ।

चतुर्वि(ग्म्)शति रर्द्धमासा अर्द्धमासा श्चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शति रर्द्धमासाः सँवथ्सरः सँवथ्सरो ऽर्द्धमासा श्चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शति रर्द्धमासाः सँवथ्सरः ।

(63)[P8] 7.4.2.5(48)– चतुर्वि(ग्म्)शतिः ।

चतुर्वि(ग्म्)शतिरिति चतुः – वि(ग्म्)शतिः ।

(64)[P8] 7.4.2.5(49)– अर्द्धमासाः । सँवथ्सरः । सँवथ्सरः ।

अर्द्धमासाः सँवथ्सरः सँवथ्सरो ऽर्द्धमासा अर्द्धमासाः सँवथ्सरः ।

(65)[P8] 7.4.2.5(49)– अर्द्धमासाः ।

अर्द्धमासा इत्यर्द्ध – मासाः ।

(66)[P8] 7.4.2.5(50)– सँवथ्सरः । सँवथ्सरः ।

सँवथ्सरः सँवथ्सरः ।

(67)[P8] 7.4.2.5(50)– सँवथ्सरः ।

सँवथ्सर इति सं – वथ्सरः ।

(68)[P8] 7.4.2.5(51)– सँवथ्सरः । सुवर्गः । लोकः ।

सँवथ्सरः सुवर्गः सुवर्गः सँवथ्सरः सँवथ्सरः सुवर्गो लोको लोकः सुवर्गः सँवथ्सरः सँवथ्सरः सुवर्गो लोकः ।

(69)[P8] 7.4.2.5(51)– सँवथ्सरः ।

सँवथ्सर इति सं – वथ्सरः ।

(70)[P8] 7.4.2.5(52)– सुवर्गः । लोकः । सँवथ्सरे ।

सुवर्गो लोको लोकः सुवर्गः सुवर्गो लोकः सँवथ्सरे सँवथ्सरे लोकः सुवर्गः सुवर्गो लोकः सँवथ्सरे ।

(71)[P8] 7.4.2.5(52)- सुवर्गः ।

सुवर्ग इति सुवः - गः ।

(72)[P8] 7.4.2.5(53)- लोकः । सँवथ्सरे । एव ।

लोकः सँवथ्सरे सँवथ्सरे लोको लोकः सँवथ्सर एवैव सँवथ्सरे लोको लोकः सँवथ्सर एव ।

(73)[P8] 7.4.2.5(54)- सँवथ्सरे । एव । सुवर्गे ।

सँवथ्सर एवैव सँवथ्सरे सँवथ्सर एव सुवर्गे सुवर्ग एव सँवथ्सरे सँवथ्सर एव सुवर्गे ।

(74)[P8] 7.4.2.5(54)- सँवथ्सरे ।

सँवथ्सर इति सं - वथ्सरे ।

(75)[P8] 7.4.2.5(55)- एव । सुवर्गे । लोके ।

एव सुवर्गे सुवर्ग एवैव सुवर्गे लोके लोके सुवर्ग एवैव सुवर्गे लोके ।

(76)[P8] 7.4.2.5(56)- सुवर्गे । लोके । प्रति ।

सुवर्गे लोके लोके सुवर्गे सुवर्गे लोके प्रति प्रति लोके सुवर्गे सुवर्गे लोके प्रति ।

(77)[P8] 7.4.2.5(56)- सुवर्गे ।

सुवर्ग इति सुवः - गे ।

(78)[P8] 7.4.2.5(57)- लोके । प्रति । तिष्ठन्ति ।

लोके प्रति प्रति लोके लोके प्रति तिष्ठन्ति तिष्ठन्ति प्रति लोके लोके प्रति तिष्ठन्ति ।

(79)[P8] 7.4.2.5(58)- प्रति । तिष्ठन्ति । अथो ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यथो अथो तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यथो ।

(80)[P8] 7.4.2.5(59)– तिष्ठन्ति । अथो । चतुर्वि(ग्म्)शत्यक्षरा ।

तिष्ठ न्त्यथो अथो तिष्ठन्ति तिष्ठ न्त्यथो चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा ऽथो तिष्ठन्ति तिष्ठ न्त्यथो चतुर्वि(ग्म्)शत्यक्षरा ।

(81)[P8] 7.4.2.5(60)– अथो । चतुर्वि(ग्म्)शत्यक्षरा । गायत्री ।

अथो चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा ऽथो अथो चतुर्वि(ग्म्)शत्यक्षरा गायत्री गायत्री चतुर्वि(ग्म्)शत्यक्षरा ऽथो अथो चतुर्वि(ग्म्)शत्यक्षरा गायत्री ।

(82)[P8] 7.4.2.5(60)– अथो ।

अथो इत्यथो ।

(83)[P8] 7.4.2.5(61)– चतुर्वि(ग्म्)शत्यक्षरा । गायत्री । गायत्री ।

चतुर्वि(ग्म्)शत्यक्षरा गायत्री गायत्री चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा गायत्री ।

(84)[P8] 7.4.2.5(61)– चतुर्वि(ग्म्)शत्यक्षरा ।

चतुर्वि(ग्म्)शत्यक्षरेति चतुर्वि(ग्म्)शति – अक्षरा ।

(85)[P8] 7.4.2.5(62)– गायत्री । गायत्री ।

गायत्री गायत्री ।

(86)[P8] 7.4.2.5(63)– गायत्री । ब्रह्मवर्चसम् । गायत्रिया ।

गायत्री ब्रह्मवर्चसम् ब्रह्मवर्चसम् गायत्री गायत्री ब्रह्मवर्चसम् गायत्रिया गायत्रिया ब्रह्मवर्चसम् गायत्री गायत्री ब्रह्मवर्चसम् गायत्रिया ।

(87)[P8] 7.4.2.5(64)– ब्रह्मवर्चसम् । गायत्रिया । एव ।

ब्रह्मवर्चसम् गायत्रिया गायत्रिया ब्रह्मवर्चसम् ब्रह्मवर्चसम् गायत्रियैवैव गायत्रिया ब्रह्मवर्चसम् ब्रह्मवर्चसम् गायत्रियैव ।

(88)[P8] 7.4.2.5(64)- ब्रह्मवर्चसम् ।

ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् ।

(89)[P8] 7.4.2.5(65)- गायत्रिया । एव । ब्रह्मवर्चसम् ।

गायत्रियैवैव गायत्रिया गायत्रियैव ब्रह्मवर्चसम् ब्रह्मवर्चस मेव गायत्रिया गायत्रियैव ब्रह्मवर्चसम् ।

(90)[P8] 7.4.2.5(66)- एव । ब्रह्मवर्चसम् । अव ।

एव ब्रह्मवर्चसम् ब्रह्मवर्चस मेवैव ब्रह्मवर्चस मवाव ब्रह्मवर्चस मेवैव ब्रह्मवर्चस मव ।

(91)[P8] 7.4.2.5(67)- ब्रह्मवर्चसम् । अव । रुन्धते ।

ब्रह्मवर्चस मवाव ब्रह्मवर्चसम् ब्रह्मवर्चस मव रुन्धते रुन्धते ऽव ब्रह्मवर्चसम् ब्रह्मवर्चस मव रुन्धते ।

(92)[P8] 7.4.2.5(67)- ब्रह्मवर्चसम् ।

ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् ।

(93)[P8] 7.4.2.5(68)- अव । रुन्धते । अतिरात्रौ ।

अव रुन्धते रुन्धते ऽवाव रुन्धते ऽतिरात्रा वतिरात्रौ रुन्धते ऽवाव रुन्धते ऽतिरात्रौ ।

(94)[P8] 7.4.2.5(69)- रुन्धते । अतिरात्रौ । अभितः ।

रुन्धते ऽतिरात्रा वतिरात्रौ रुन्धते रुन्धते ऽतिरात्रा वभितो ऽभितो ऽतिरात्रौ रुन्धते रुन्धते ऽतिरात्रा वभितः ।

(95)[P8] 7.4.2.5(70)- अतिरात्रौ । अभितः । भवतः ।

अतिरात्रा वभितो ऽभितो ऽतिरात्रा वतिरात्रा वभितो भवतो भवतो ऽभितो ऽतिरात्रा वतिरात्रा वभितो भवतः ।

(96)[P8] 7.4.2.5(70)– अतिरात्रौ ।

अतिरात्रावित्यति – रात्रौ ।

(97)[P8] 7.4.2.5(71)– अभितः । भवतः । ब्रह्मवर्चसस्य ।

अभितो भवतो भवतो ऽभितो ऽभितो भवतो ब्रह्मवर्चसस्य ब्रह्मवर्चसस्य भवतो ऽभितो ऽभितो भवतो ब्रह्मवर्चसस्य ।

(98)[P8] 7.4.2.5(72)– भवतः । ब्रह्मवर्चसस्य । परिगृहीत्यै ॥

भवतो ब्रह्मवर्चसस्य ब्रह्मवर्चसस्य भवतो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै परिगृहीत्यै ब्रह्मवर्चसस्य भवतो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ।

(99)[P8] 7.4.2.5(73)– ब्रह्मवर्चसस्य । परिगृहीत्यै ॥

ब्रह्मवर्चसस्य परिगृहीत्यै परिगृहीत्यै ब्रह्मवर्चसस्य ब्रह्मवर्चसस्य परिगृहीत्यै ।

(100)[P8] 7.4.2.5(73)– ब्रह्मवर्चसस्य ।

ब्रह्मवर्चस्येति ब्रह्म – वर्चसस्य ।

(101)[P8] 7.4.2.5(74)– परिगृहीत्यै ॥

परिगृहीत्या इति परि – गृहीत्यै ।

=====

## 7.4.3 अनुवाकम् 3 – घनम्

(1)[P9] 7.4.3.1(1)– ऋक्षा । वै । इयम् ।

ऋक्षा वै वा ऋक्ष र्क्षा वा इय मियं वा ऋक्ष र्क्षा वा इयम् ।

(2)[P9] 7.4.3.1(2)– वै । इयम् । अलोमका ।

वा इय मियं वै वा इय मलोमका ऽलोमकेयं वै वा इय मलोमका ।

(3)[P9] 7.4.3.1(3)– इयम् । अलोमका । आसीत् ।

इय मलोमका ऽलोमकेय मिय मलोमका ऽऽसी दासी दलोमकेय मिय मलोमका ऽऽसीत् ।

(4)[P9] 7.4.3.1(4)– अलोमका । आसीत् । सा ।

अलोमका ऽऽसी दासी दलोमका ऽलोमका ऽऽसीथ् सा सा ऽऽसी दलोमका ऽलोमका ऽऽसीथ् सा ।

(5)[P9] 7.4.3.1(5)– आसीत् । सा । अकामयत ।

आसीथ् सा सा ऽऽसी दासीथ् सा ऽकामयता कामयत सा ऽऽसी दासीथ् सा ऽकामयत ।

(6)[P9] 7.4.3.1(6)– सा । अकामयत । ओषधीभिः ।

सा ऽकामयता कामयत सा सा ऽकामय तौषधीभि रोषधीभि रकामयत सा सा ऽकामय तौषधीभिः ।

(7)[P9] 7.4.3.1(7)– अकामयत । ओषधीभिः । वनस्पतिभिः ।

अकामय तौषधीभि रोषधीभि रकामयता कामय तौषधीभिर् वनस्पतिभिर् वनस्पतिभि रोषधीभि रकामयता कामय तौषधीभिर् वनस्पतिभिः ।

(8)[P9] 7.4.3.1(8)– ओषधीभिः । वनस्पतिभिः । प्र ।

ओषधीभिर् वनस्पतिभिर् वनस्पतिभि रोषधीभि रोषधीभिर् वनस्पतिभिः प्र प्र वणस्पतिभि रोषधीभि रोषधीभिर् वनस्पतिभिः प्र ।

(9)[P9] 7.4.3.1(8)– ओषधीभिः ।

ओषधीभिरित्योषधि – भिः ।

(10)[P9] 7.4.3.1(9)– वनस्पतिभिः । प्र । जायेय । (GS–7.4–03)

वनस्पतिभिः प्र प्र वणस्पतिभिर् वनस्पतिभिः प्र जायेय जायेय प्र वणस्पतिभिर् वनस्पतिभिः प्र जायेय ।

(11)[P9] 7.4.3.1(9)– वनस्पतिभिः । (GS–7.4–03)

वनस्पतिभिरिति वनस्पति – भिः ।

(12)[P9] 7.4.3.1(10)– प्र । जायेय । इति । (GS–7.4–03)

प्र जायेय जायेय प्र प्र जायेयेतीति जायेय प्र प्र जायेयेति ।

(13)[P9] 7.4.3.1(11)– जायेय । इति । सा । (GS–7.4–03)

जायेयेतीति जायेय जायेयेति सा सेति जायेय जायेयेति सा ।

(14)[P9] 7.4.3.1(12)– इति । सा । एताः । (GS–7.4–03)

इति सा सेतीति सैता एताः सेतीति सैताः ।

(15)[P9] 7.4.3.1(13)– सा । एताः । त्रि(ग्म्)शतम् ।

सैता एताः सा सैता स्त्रि(ग्म्)शतम् त्रि(ग्म्)शत मेताः सा सैता स्त्रि(ग्म्)शतम् ।

(16)[P9] 7.4.3.1(14)– एताः । त्रि(ग्म्)शतम् । रात्रीः ।

एता स्त्रि(ग्म्)शतम् त्रि(ग्म्)शत मेता एता स्त्रि(ग्म्)शत(ग्म्) रात्री रात्री स्त्रि(ग्म्)शत मेता एता स्त्रि(ग्म्)शत(ग्म्) रात्रीः ।

(17)[P9] 7.4.3.1(15)– त्रि(ग्म्)शतम् । रात्रीः । अपश्यत् । (GS–7.4–04)

त्रि(ग्म्)शत(ग्म्) रात्री रात्री स्त्रि(ग्म्)शतम् त्रि(ग्म्)शत(ग्म्) रात्री रपश्य दपश्यद् रात्री स्त्रि(ग्म्)शतम् त्रि(ग्म्)शत(ग्म्) रात्री रपश्यत् ।

(18)[P9] 7.4.3.1(16)- रात्रीः । अपश्यत् । ततः । (GS-7.4-04)

रात्री रपश्य दपश्यद् रात्री रात्री रपश्यत् तत स्ततो ऽपश्यद् रात्री रात्री रपश्यत् ततः ।

(19)[P9] 7.4.3.1(17)- अपश्यत् । ततः । वै । (GS-7.4-04)

अपश्यत् तत स्ततो ऽपश्य दपश्यत् ततो वै वै ततो ऽपश्य दपश्यत् ततो वै ।

(20)[P9] 7.4.3.1(18)- ततः । वै । इयम् ।

ततो वै वै तत स्ततो वा इय मियं ँवै तत स्ततो वा इयम् ।

(21)[P9] 7.4.3.1(19)- वै । इयम् । ओषधीभिः ।

वा इय मियं ँवै वा इय मोषधीभि रोषधीभि रियं ँवै वा इय मोषधीभिः ।

(22)[P9] 7.4.3.1(20)- इयम् । ओषधीभिः । वनस्पतिभिः ।

इय मोषधीभि रोषधीभि रिय मिय मोषधीभिर् वनस्पतिभिर् वनस्पतिभि रोषधीभि रिय मिय मोषधीभिर् वनस्पतिभिः ।

(23)[P9] 7.4.3.1(21)- ओषधीभिः । वनस्पतिभिः । प्र ।

ओषधीभिर् वनस्पतिभिर् वनस्पतिभि रोषधीभि रोषधीभिर् वनस्पतिभिः प्र प्र वणस्पतिभि रोषधीभि रोषधीभिर् वनस्पतिभिः प्र ।

(24)[P9] 7.4.3.1(21)- ओषधीभिः ।

ओषधीभिरित्योषधि - भिः ।

(25)[P9] 7.4.3.1(22)- वनस्पतिभिः । प्र । अजायत । (GS-7.4-05)

वनस्पतिभिः प्र प्र वणस्पतिभिर् वनस्पतिभिः प्राजायता जायत प्र वणस्पतिभिर् वनस्पतिभिः प्राजायत ।

(26)[P9] 7.4.3.1(22)- वनस्पतिभिः । (GS-7.4-05)

वनस्पतिभिरिति वनस्पति - भिः ।

(27)[P9] 7.4.3.1(23)– प्र । अजायत । ये । (GS–7.4–05)

प्राजायता जायत प्र प्राजायत ये ये ऽजायत प्र प्राजायत ये ।

(28)[P9] 7.4.3.1(24)– अजायत । ये । प्रजाकामाः । (GS–7.4–05)

अजायत ये ये ऽजायता जायत ये प्रजाकामाः प्रजाकामा ये ऽजायता जायत ये प्रजाकामाः ।

(29)[P9] 7.4.3.1(25)– ये । प्रजाकामाः । पशुकामाः ।

ये प्रजाकामाः प्रजाकामा ये ये प्रजाकामाः पशुकामाः पशुकामाः प्रजाकामा ये ये प्रजाकामाः पशुकामाः ।

(30)[P9] 7.4.3.1(26)– प्रजाकामाः । पशुकामाः । स्युः ।

प्रजाकामाः पशुकामाः पशुकामाः प्रजाकामाः प्रजाकामाः पशुकामाः स्युः स्युः पशुकामाः प्रजाकामाः प्रजाकामाः पशुकामाः स्युः ।

(31)[P9] 7.4.3.1(26)– प्रजाकामाः ।

प्रजाकामा इति प्रजा – कामाः ।

(32)[P9] 7.4.3.1(27)– पशुकामाः । स्युः । ते ।

पशुकामाः स्युः स्युः पशुकामाः पशुकामाः स्यु स्ते ते स्युः पशुकामाः पशुकामाः स्यु स्ते ।

(33)[P9] 7.4.3.1(27)– पशुकामाः ।

पशुकामा इति पशु – कामाः ।

(34)[P9] 7.4.3.1(28)– स्युः । ते । एताः ।

स्यु स्ते ते स्युः स्यु स्त एता एता स्ते स्युः स्यु स्त एताः ।

(35)[P9] 7.4.3.1(29)– ते । एताः । आसीरन्न् ।

त एता एता स्ते त एता आसीरन् नासीरन् नेता स्ते त एता आसीरन्न् ।

(36)[P9] 7.4.3.1(30)– एताः । आसीरन्न् । प्र ।

एता आसीरन् नासीरन् नेता एता आसीरन् प्र प्रासीरन् नेता एता आसीरन् प्र ।

(37)[P9] 7.4.3.1(31)– आसीरन्न् । प्र । एव ।

आसीरन् प्र प्रासीरन् नासीरन् प्रैवैव प्रासीरन् नासीरन् प्रैव ।

(38)[P9] 7.4.3.1(32)– प्र । एव । जायन्ते ।

प्रैवैव प्र प्रैव जायन्ते जायन्त एव प्र प्रैव जायन्ते ।

(39)[P9] 7.4.3.1(33)– एव । जायन्ते । प्रजया ।

एव जायन्ते जायन्त एवैव जायन्ते प्रजया प्रजया जायन्त एवैव जायन्ते प्रजया ।

(40)[P9] 7.4.3.1(34)– जायन्ते । प्रजया । पशुभिः ।

जायन्ते प्रजया प्रजया जायन्ते जायन्ते प्रजया पशुभिः पशुभिः प्रजया जायन्ते जायन्ते प्रजया पशुभिः ।

(41)[P9] 7.4.3.1(35)– प्रजया । पशुभिः । इयम् ।

प्रजया पशुभिः पशुभिः प्रजया प्रजया पशुभि रिय मियम् पशुभिः प्रजया प्रजया पशुभि रियम् ।

(42)[P9] 7.4.3.1(35)– प्रजया ।

प्रजयेति प्र – जया ।

(43)[P9] 7.4.3.1(36)– पशुभिः । इयम् । वै ।

पशुभि रिय मियम् पशुभिः पशुभि रियं ँवै वा इयम् पशुभिः पशुभि रियं ँवै ।

(44)[P9] 7.4.3.1(36)– पशुभिः ।

पशुभिरिति पशु – भिः ।

(45)[P9] 7.4.3.1(37)– इयम् । वै । अक्षुद्ध्यत् ।

इयं ँवै वा इय मियं ँवा अक्षुद्ध्य दक्षुद्ध्यद् वा इय मियं ँवा अक्षुद्ध्यत् ।

(46)[P9] 7.4.3.1(38)– वै । अक्षुद्ध्यत् । सा ।

वा अक्षुद्ध्य दक्षुद्ध्यद् वै वा अक्षुद्ध्यथ् सा सा ऽक्षुद्ध्यद् वै वा अक्षुद्ध्यथ् सा ।

(47)[P9] 7.4.3.1(39)– अक्षुद्ध्यत् । सा । एताम् ।

अक्षुद्ध्यथ् सा सा ऽक्षुद्ध्य दक्षुद्ध्यथ् सैता मेता(ग्म्) सा ऽक्षुद्ध्य दक्षुद्ध्यथ् सैताम् ।

(48)[P9] 7.4.3.1(40)– सा । एताम् । विराजम् ।

सैता मेता(ग्म्) सा सैतां ँविराजं ँविराज मेता(ग्म्) सा सैतां ँविराजम् ।

(49)[P9] 7.4.3.1(41)– एताम् । विराजम् । अपश्यत् ।

एतां ँविराजं ँविराज मेता मेतां ँविराज मपश्य दपश्यद् विराज मेता मेतां ँविराज मपश्यत् ।

(50)[P9] 7.4.3.1(42)– विराजम् । अपश्यत् । ताम् ।

विराज मपश्य दपश्यद् विराजं ँविराज मपश्यत् ताम् ता मपश्यद् विराजं ँविराज मपश्यत् ताम् ।

(51)[P9] 7.4.3.1(42)– विराजम् ।

विराजमिति वि – राजम् ।

(52)[P9] 7.4.3.1(43)– अपश्यत् । ताम् । आत्मन्न् ।

अपश्यत् ताम् ता मपश्य दपश्यत् ता मात्मन् नात्मन् ता मपश्य दपश्यत् ता मात्मन्न् ।

(53)[P9] 7.4.3.1(44)– ताम् । आत्मन्न् । धित्वा ।

ता मात्मन् नात्मन् ताम् ता मात्मन् धित्वा धित्वा ऽऽत्मन् ताम् ता मात्मन् धित्वा ।

(54)[P9] 7.4.3.1(45)- आत्मन्न् । धित्वा । अन्नाद्यम् ।

आत्मन् धित्वा धित्वा ऽऽत्मन् नात्मन् धित्वा ऽन्नाद्य मन्नाद्यम् धित्वा ऽऽत्मन् नात्मन् धित्वा ऽन्नाद्यम् ।

(55)[P9] 7.4.3.1(46)- धित्वा । अन्नाद्यम् । अव ।

धित्वा ऽन्नाद्य मन्नाद्यम् धित्वा धित्वा ऽन्नाद्य मवा वान्नाद्यम् धित्वा धित्वा ऽन्नाद्य मव ।

(56)[P9] 7.4.3.1(47)- अन्नाद्यम् । अव । अरुन्ध ।

अन्नाद्य मवा वान्नाद्य मन्नाद्य मवा रुन्धा रुन्धा वान्नाद्य मन्नाद्य मवारुन्ध ।

(57)[P9] 7.4.3.1(47)- अन्नाद्यम् ।

अन्नाद्यमित्यन्न - अद्यम् ।

(58)[P9] 7.4.3.1(48)- अव । अरुन्ध । ओषधीः ।

अवा रुन्धा रुन्धा वावा रुन्धौषधी रोषधी ररुन्धा वावा रुन्धौषधीः ।

(59)[P9] 7.4.3.1(49)- अरुन्ध । ओषधीः । वनस्पतीन् । (GD-49)

अरुन्धौषधी रोषधी ररुन्धा रुन्धौषधीर् वनस्पतीन्. वनस्पती नोषधी ररुन्धा रुन्धौषधीर् वनस्पतीन् ।

(60)[P9] 7.4.3.1(50)- ओषधीः । वनस्पतीन् । प्रजाम् । (GD-49)

ओषधीर् वनस्पतीन्. वनस्पती नोषधी रोषधीर् वनस्पतीन् प्रजाम् प्रजां ँवनस्पती नोषधी रोषधीर् वनस्पतीन् प्रजाम् ।

(1)[P10] 7.4.3.2(1)- वनस्पतीन् । प्रजाम् । पशून् । (GD-49)

वनस्पतीन् प्रजाम् प्रजां ँवनस्पतीन्. वनस्पतीन् प्रजाम् पशून् पशून् प्रजां ँवनस्पतीन्. वनस्पतीन् प्रजाम् पशून् ।

(2)[P10] 7.4.3.2(2)- प्रजाम् । पशून् । तेन ।

प्रजाम् पशून् पशून् प्रजाम् प्रजाम् पशून् तेन तेन पशून् प्रजाम् प्रजाम् पशून् तेन ।

(3)[P10] 7.4.3.2(2)- प्रजाम् ।

प्रजामिति प्र – जाम् ।

(4)[P10] 7.4.3.2(3)- पशून् । तेन । अवर्द्धत ।

पशून् तेन तेन पशून् पशून् तेना वर्द्धता वर्द्धत तेन पशून् पशून् तेना वर्द्धत ।

(5)[P10] 7.4.3.2(4)- तेन । अवर्द्धत । सा ।

तेना वर्द्धता वर्द्धत तेन तेना वर्द्धत सा सा ऽवर्द्धत तेन तेना वर्द्धत सा ।

(6)[P10] 7.4.3.2(5)- अवर्द्धत । सा । जेमानम् ।

अवर्द्धत सा सा ऽवर्द्धता वर्द्धत सा जेमानम् जेमान(ग्म्) सा ऽवर्द्धता वर्द्धत सा जेमानम् ।

(7)[P10] 7.4.3.2(6)- सा । जेमानम् । महिमानम् ।

सा जेमानम् जेमान(ग्म्) सा सा जेमानम् महिमानम् महिमानम् जेमान(ग्म्) सा सा जेमानम् महिमानम् ।

(8)[P10] 7.4.3.2(7)- जेमानम् । महिमानम् । अगच्छत् ।

जेमानम् महिमानम् महिमानम् जेमानम् जेमानम् महिमान मगच्छ दगच्छन् महिमानम् जेमानम् जेमानम् महिमान मगच्छत् ।

(9)[P10] 7.4.3.2(8)- महिमानम् । अगच्छत् । ये ।

महिमान मगच्छ दगच्छन् महिमानम् महिमान मगच्छद् ये ये ऽगच्छन् महिमानम् महिमान मगच्छद् ये ।

(10)[P10] 7.4.3.2(9)- अगच्छत् । ये । एवम् ।

अगच्छद् ये ये ऽगच्छ दगच्छद् य एव मेवं ँये ऽगच्छ दगच्छद् य एवम् ।

(11)[P10] 7.4.3.2(10)- ये । एवम् । विद्वा(ग्म्)सः ।

य एव मेवं ँये य एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एवं ँये य एवं ँविद्वा(ग्म्)सः ।

(12)[P10] 7.4.3.2(11)- एवम् । विद्वा(ग्म्)सः । एताः ।

एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एता एता विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एताः ।

(13)[P10] 7.4.3.2(12)- विद्वा(ग्म्)सः । एताः । आसते ।

विद्वा(ग्म्)स एता एता विद्वा(ग्म्)सो विद्वा(ग्म्)स एता आसत आसत एता विद्वा(ग्म्)सो विद्वा(ग्म्)स एता आसते ।

(14)[P10] 7.4.3.2(13)- एताः । आसते । विराजम् ।

एता आसत आसत एता एता आसते विराजं ँविराज मासत एता एता आसते विराजम् ।

(15)[P10] 7.4.3.2(14)- आसते । विराजम् । एव ।

आसते विराजं ँविराज मासत आसते विराज मेवैव विराज मासत आसते विराज मेव ।

(16)[P10] 7.4.3.2(15)- विराजम् । एव । आत्मन्न् ।

विराज मेवैव विराजं ँविराज मेवात्मन् नात्मन् नेव विराजं ँविराज मेवात्मन्न् ।

(17)[P10] 7.4.3.2(15)- विराजम् ।

विराजमिति वि - राजम् ।

(18)[P10] 7.4.3.2(16)- एव । आत्मन्न् । धित्वा ।

एवात्मन् नात्मन् नेवै वात्मन् धित्वा धित्वा ऽऽत्मन् नेवै वात्मन् धित्वा ।

(19)[P10] 7.4.3.2(17)- आत्मन्न् । धित्वा । अन्नाद्यम् । (GS-7.4-01)

आत्मन् धित्वा धित्वा ऽऽत्मन् नात्मन् धित्वा ऽन्नाद्य मन्नाद्यम् धित्वा ऽऽत्मन् नात्मन् धित्वा ऽन्नाद्यम् ।

(20)[P10] 7.4.3.2(18)- धित्वा । अन्नाद्यम् । अव । (GS-7.4-01)

धित्वा ऽन्नाद्य मन्नाद्यम् धित्वा धित्वा ऽन्नाद्य मवा वान्नाद्यम् धित्वा धित्वा ऽन्नाद्य मव ।

(21)[P10] 7.4.3.2(19)- अन्नाद्यम् । अव । रुन्धते । (GS-7.4-01)

अन्नाद्य मवा वान्नाद्य मन्नाद्य मव रुन्धते रुन्धते ऽवान्नाद्य मन्नाद्य मव रुन्धते ।

(22)[P10] 7.4.3.2(19)- अन्नाद्यम् । (GS-7.4-01)

अन्नाद्यमित्यन्न - अद्यम् ।

(23)[P10] 7.4.3.2(20)- अव । रुन्धते । वर्द्धन्ते । (GS-7.4-01)

अव रुन्धते रुन्धते ऽवाव रुन्धते वर्द्धन्ते वर्द्धन्ते रुन्धते ऽवाव रुन्धते वर्द्धन्ते ।

(24)[P10] 7.4.3.2(21)- रुन्धते । वर्द्धन्ते । प्रजया । (GS-7.4-01)

रुन्धते वर्द्धन्ते वर्द्धन्ते रुन्धते रुन्धते वर्द्धन्ते प्रजया प्रजया वर्द्धन्ते रुन्धते रुन्धते वर्द्धन्ते प्रजया ।

(25)[P10] 7.4.3.2(22)- वर्द्धन्ते । प्रजया । पशुभिः । (GS-7.4-01)

वर्द्धन्ते प्रजया प्रजया वर्द्धन्ते वर्द्धन्ते प्रजया पशुभिः पशुभिः प्रजया वर्द्धन्ते वर्द्धन्ते प्रजया पशुभिः ।

(26)[P10] 7.4.3.2(23)- प्रजया । पशुभिः । जेमानम् ।

प्रजया पशुभिः पशुभिः प्रजया प्रजया पशुभिर् जेमानम् जेमानम् पशुभिः प्रजया प्रजया पशुभिर् जेमानम् ।

(27)[P10] 7.4.3.2(23)- प्रजया ।

प्रजयेति प्र - जया ।

(28)[P10] 7.4.3.2(24)– पशुभिः । जेमानम् । महिमानम् ।

पशुभिर् जेमानम् जेमानम् पशुभिः पशुभिर् जेमानम् महिमानम् महिमानम् जेमानम् पशुभिः पशुभिर् जेमानम् महिमानम् ।

(29)[P10] 7.4.3.2(24)– पशुभिः ।

पशुभिरिति पशु – भिः ।

(30)[P10] 7.4.3.2(25)– जेमानम् । महिमानम् । गच्छन्ति ।

जेमानम् महिमानम् महिमानम् जेमानम् जेमानम् महिमानम् गच्छन्ति गच्छन्ति महिमानम् जेमानम् जेमानम् महिमानम् गच्छन्ति ।

(31)[P10] 7.4.3.2(26)– महिमानम् । गच्छन्ति । ज्योतिः ।

महिमानम् गच्छन्ति गच्छन्ति महिमानम् महिमानम् गच्छन्ति ज्योतिर् ज्योतिर् गच्छन्ति महिमानम् महिमानम् गच्छन्ति ज्योतिः ।

(32)[P10] 7.4.3.2(27)– गच्छन्ति । ज्योतिः । अतिरात्रः ।

गच्छन्ति ज्योतिर् ज्योतिर् गच्छन्ति गच्छन्ति ज्योति रतिरात्रो ऽतिरात्रो ज्योतिर् गच्छन्ति गच्छन्ति ज्योति रतिरात्रः ।

(33)[P10] 7.4.3.2(28)– ज्योतिः । अतिरात्रः । भवति ।

ज्योति रतिरात्रो ऽतिरात्रो ज्योतिर् ज्योति रतिरात्रो भवति भव त्यतिरात्रो ज्योतिर् ज्योति रतिरात्रो भवति ।

(34)[P10] 7.4.3.2(29)– अतिरात्रः । भवति । सुवर्गस्य ।

अतिरात्रो भवति भव त्यतिरात्रो ऽतिरात्रो भवति सुवर्गस्य सुवर्गस्य भव त्यतिरात्रो ऽतिरात्रो भवति सुवर्गस्य ।

(35)[P10] 7.4.3.2(29)– अतिरात्रः ।

अतिरात्र इत्यति – रात्रः ।

(36)[P10] 7.4.3.2(30)– भवति । सुवर्गस्य । लोकस्य ।

भवति सुवर्गस्य सुवर्गस्य भवति भवति सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य भवति भवति सुवर्गस्य लोकस्य ।

(37)[P10] 7.4.3.2(31)– सुवर्गस्य । लोकस्य । अनुख्यात्यै ।

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या नुख्यात्या अनुख्यात्यै लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या नुख्यात्यै ।

(38)[P10] 7.4.3.2(31)– सुवर्गस्य ।

सुवर्गस्येति सुवः – गस्य ।

(39)[P10] 7.4.3.2(32)– लोकस्य । अनुख्यात्यै । पृष्ठ्यः ।

लोकस्या नुख्यात्या अनुख्यात्यै लोकस्य लोकस्या नुख्यात्यै पृष्ठ्यः पृष्ठ्यो ऽनुख्यात्यै लोकस्य लोकस्या नुख्यात्यै पृष्ठ्यः ।

(40)[P10] 7.4.3.2(33)– अनुख्यात्यै । पृष्ठ्यः । षडहः ।

अनुख्यात्यै पृष्ठ्यः पृष्ठ्यो ऽनुख्यात्या अनुख्यात्यै पृष्ठ्य षडह षडहः पृष्ठ्यो ऽनुख्यात्या अनुख्यात्यै पृष्ठ्य षडहः ।

(41)[P10] 7.4.3.2(33)– अनुख्यात्यै ।

अनुख्यात्या इत्यनु – ख्यात्यै ।

(42)[P10] 7.4.3.2(34)– पृष्ठ्यः । षडहः । भवति ।

पृष्ठ्य षडह षडहः पृष्ठ्यः पृष्ठ्य षडहो भवति भवति षडहः पृष्ठ्यः पृष्ठ्य षडहो भवति ।

(43)[P10] 7.4.3.2(35)- षडहः । भवति । षट् ।

षडहो भवति भवति षडह ष्षडहो भवति षट् थ्षड् भवति षडह ष्षडहो भवति षट् ।

(44)[P10] 7.4.3.2(35)- षडहः ।

षडह इति षट् - अहः ।

(45)[P10] 7.4.3.2(36)- भवति । षट् । वै ।

भवति षट् थ्षड् भवति भवति षड् वै वै षड् भवति भवति षड् वै ।

(46)[P10] 7.4.3.2(37)- षट् । वै । ऋतवः ।

षड् वै वै षट् थ्षड् वा ऋतव ऋतवो वै षट् थ्षड् वा ऋतवः ।

(47)[P10] 7.4.3.2(38)- वै । ऋतवः । षट् ।

वा ऋतव ऋतवो वै वा ऋतव ष्षट् थ्षडृतवो वै वा ऋतव ष्षट् ।

(48)[P10] 7.4.3.2(39)- ऋतवः । षट् । पृष्ठानि ।

ऋतव ष्षट् थ्षडृतव ऋतव ष्षट् पृष्ठानि पृष्ठानि षडृतव ऋतव ष्षट् पृष्ठानि ।

(49)[P10] 7.4.3.2(40)- षट् । पृष्ठानि । पृष्ठैः ।

षट् पृष्ठानि पृष्ठानि षट् थ्षट् पृष्ठानि पृष्ठैः पृष्ठैः पृष्ठानि षट् थ्षट् पृष्ठानि पृष्ठैः ।

(50)[P10] 7.4.3.2(41)- पृष्ठानि । पृष्ठैः । एव ।

पृष्ठानि पृष्ठैः पृष्ठैः पृष्ठानि पृष्ठानि पृष्ठै रेवैव पृष्ठैः पृष्ठानि पृष्ठानि पृष्ठै रेव ।

(51)[P10] 7.4.3.2(42)- पृष्ठैः । एव । ऋतून् ।

पृष्ठै रेवैव पृष्ठैः पृष्ठै रेव र्तू नृतू नेव पृष्ठैः पृष्ठै रेव र्तून् ।

(52)[P10] 7.4.3.2(43)- एव । ऋतून् । अभ्यारोहन्ति ।

एव र्तू नृतू नेवैव र्तूनभ्यारोह न्त्यभ्यारोह न्त्यृतू नेवैव र्तूनभ्यारोहन्ति ।

(53)[P10] 7.4.3.2(44)– ऋतून् । अभ्यारोहन्ति । ऋतुभिः ।

ऋतू नभ्यारोह न्त्यभ्यारोह न्त्यृतू नृतू नभ्यारोह न्त्यृतुभिर्. ऋतुभि रभ्यारोह न्त्यृतू नृतू नभ्यारोह न्त्यृतुभिः ।

(54)[P10] 7.4.3.2(45)– अभ्यारोहन्ति । ऋतुभिः । सँवथ्सरम् ।

अभ्यारोह न्त्यृतुभिर्. ऋतुभि रभ्यारोह न्त्यभ्यारोह न्त्यृतुभिः सँवथ्सर(ग्म्) सँवथ्सर मृतुभि रभ्यारोह न्त्यभ्यारोह न्त्यृतुभिः सँवथ्सरम् ।

(55)[P10] 7.4.3.2(45)– अभ्यारोहन्ति ।

अन्वारोहन्तीत्यनु – आरोहन्ति ।

(56)[P10] 7.4.3.2(46)– ऋतुभिः । सँवथ्सरम् । ते ।

ऋतुभिः सँवथ्सर(ग्म्) सँवथ्सर मृतुभिर्. ऋतुभिः सँवथ्सरम् ते ते सँवथ्सर मृतुभिर्. ऋतुभिः सँवथ्सरम् ते ।

(57)[P10] 7.4.3.2(46)– ऋतुभिः ।

ऋतुभिरित्यृतु – भिः ।

(58)[P10] 7.4.3.2(47)– सँवथ्सरम् । ते । सँवथ्सरे ।

सँवथ्सरम् ते ते सँवथ्सर(ग्म्) सँवथ्सरम् ते सँवथ्सरे सँवथ्सरे ते सँवथ्सर(ग्म्) सँवथ्सरम् ते सँवथ्सरे ।

(59)[P10] 7.4.3.2(47)– सँवथ्सरम् ।

सँवथ्सरमिति सं – वथ्सरम् ।

(60)[P10] 7.4.3.2(48)– ते । सँवथ्सरे । एव ।

ते सँवथ्सरे सँवथ्सरे ते ते सँवथ्सर एवैव सँवथ्सरे ते ते सँवथ्सर एव ।

(61)[P10] 7.4.3.2(49)- सँवथ्सरे । एव । प्रति ।

सँवथ्सर एवैव सँवथ्सरे सँवथ्सर एव प्रति प्रत्येव सँवथ्सरे सँवथ्सर एव प्रति ।

(62)[P10] 7.4.3.2(49)- सँवथ्सरे ।

सँवथ्सर इति सं - वथ्सरे ।

(63)[P10] 7.4.3.2(50)- एव । प्रति । तिष्ठन्ति ।

एव प्रति प्रत्येवैव प्रति तिष्ठन्ति तिष्ठन्ति प्रत्येवैव प्रति तिष्ठन्ति ।

(1)[P11] 7.4.3.3(1)- प्रति । तिष्ठन्ति । त्रयस्त्रि(ग्म्)शात् ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्ति त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शात् तिष्ठन्ति प्रति प्रति तिष्ठन्ति त्रयस्त्रि(ग्म्)शात् ।

(2)[P11] 7.4.3.3(2)- तिष्ठन्ति । त्रयस्त्रि(ग्म्)शात् । त्रयस्त्रि(ग्म्)शम् ।

तिष्ठन्ति त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शात् तिष्ठन्ति तिष्ठन्ति त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शात् तिष्ठन्ति तिष्ठन्ति त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शम् ।

(3)[P11] 7.4.3.3(3)- त्रयस्त्रि(ग्म्)शात् । त्रयस्त्रि(ग्म्)शम् । उप ।

त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)श मुपोप त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)शात् त्रयस्त्रि(ग्म्)श मुप ।

(4)[P11] 7.4.3.3(3)- त्रयस्त्रि(ग्म्)शात् ।

त्रयस्त्रि(ग्म्)शादिति त्रयः - त्रि(ग्म्)शात् ।

(5)[P11] 7.4.3.3(4)- त्रयस्त्रि(ग्म्)शम् । उप । यन्ति ।

त्रयस्त्रि(ग्म्)श मुपोप त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)श मुप यन्ति यन्त्युप त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)श मुप यन्ति ।

(6)[P11] 7.4.3.3(4)– त्रयस्त्रि(गम्)शम् ।

त्रयस्त्रि(गम्)शमिति त्रयः – त्रि(गम्)शम् ।

(7)[P11] 7.4.3.3(5)– उप । यन्ति । यज्ञस्य ।

उप यन्ति यन्त्युपोप यन्ति यज्ञस्य यज्ञस्य यन्त्युपोप यन्ति यज्ञस्य ।

(8)[P11] 7.4.3.3(6)– यन्ति । यज्ञस्य । सन्तत्यै ।

यन्ति यज्ञस्य यज्ञस्य यन्ति यन्ति यज्ञस्य सन्तत्यै सन्तत्यै यज्ञस्य यन्ति यन्ति यज्ञस्य सन्तत्यै ।

(9)[P11] 7.4.3.3(7)– यज्ञस्य । सन्तत्यै । अथो ।

यज्ञस्य सन्तत्यै सन्तत्यै यज्ञस्य यज्ञस्य सन्तत्या अथो अथो सन्तत्यै यज्ञस्य यज्ञस्य सन्तत्या अथो ।

(10)[P11] 7.4.3.3(8)– सन्तत्यै । अथो । प्रजापतिः ।

सन्तत्या अथो अथो सन्तत्यै सन्तत्या अथो प्रजापतिः प्रजापति रथो सन्तत्यै सन्तत्या अथो प्रजापतिः ।

(11)[P11] 7.4.3.3(8)– सन्तत्यै ।

सन्तत्या इति सं – तत्यै ।

(12)[P11] 7.4.3.3(9)– अथो । प्रजापतिः । वै ।

अथो प्रजापतिः प्रजापति रथो अथो प्रजापतिर् वै वै प्रजापति रथो अथो प्रजापतिर् वै ।

(13)[P11] 7.4.3.3(9)– अथो ।

अथो इत्यथो ।

(14)[P11] 7.4.3.3(10)– प्रजापतिः । वै । त्रयस्त्रि(ग्म्)शः ।

प्रजापतिर् वै वै प्रजापतिः प्रजापतिर् वै त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शो वै प्रजापतिः प्रजापतिर् वै त्रयस्त्रि(ग्म्)शः ।

(15)[P11] 7.4.3.3(10)– प्रजापतिः ।

प्रजापतिरिति प्रजा – पतिः ।

(16)[P11] 7.4.3.3(11)– वै । त्रयस्त्रि(ग्म्)शः । प्रजापतिम् ।

वै त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शो वै वै त्रयस्त्रि(ग्म्)शः प्रजापतिम् प्रजापतिम् त्रयस्त्रि(ग्म्)शो वै वै त्रयस्त्रि(ग्म्)शः प्रजापतिम् ।

(17)[P11] 7.4.3.3(12)– त्रयस्त्रि(ग्म्)शः । प्रजापतिम् । एव ।

त्रयस्त्रि(ग्म्)शः प्रजापतिम् प्रजापतिम् त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शः प्रजापति मेवैव प्रजापतिम् त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शः प्रजापति मेव ।

(18)[P11] 7.4.3.3(12)– त्रयस्त्रि(ग्म्)शः ।

त्रयस्त्रि(ग्म्)श इति त्रयः – त्रि(ग्म्)शः ।

(19)[P11] 7.4.3.3(13)– प्रजापतिम् । एव । आ ।

प्रजापति मेवैव प्रजापतिम् प्रजापति मेवैव प्रजापतिम् प्रजापति मेवा ।

(20)[P11] 7.4.3.3(13)– प्रजापतिम् ।

प्रजापतिमिति प्रजा – पतिम् ।

(21)[P11] 7.4.3.3(14)– एव । आ । रभन्ते ।

एवै वैवा रभन्ते रभन्त ऐवैवा रभन्ते ।

(22)[P11] 7.4.3.3(15)– आ । रभन्ते । प्रतिष्ठित्यै ।

आ रभन्ते रभन्त आ रभन्ते प्रतिष्ठित्यै प्रतिष्ठित्यै रभन्त आ रभन्ते प्रतिष्ठित्यै ।

(23)[P11] 7.4.3.3(16)- रभन्ते । प्रतिष्ठित्यै । त्रिणवः ।

रभन्ते प्रतिष्ठित्यै प्रतिष्ठित्यै रभन्ते रभन्ते प्रतिष्ठित्यै त्रिणव स्त्रिणवः प्रतिष्ठित्यै रभन्ते रभन्ते प्रतिष्ठित्यै त्रिणवः ।

(24)[P11] 7.4.3.3(17)- प्रतिष्ठित्यै । त्रिणवः । भवति ।

प्रतिष्ठित्यै त्रिणव स्त्रिणवः प्रतिष्ठित्यै प्रतिष्ठित्यै त्रिणवो भवति भवति त्रिणवः प्रतिष्ठित्यै प्रतिष्ठित्यै त्रिणवो भवति ।

(25)[P11] 7.4.3.3(17)- प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति - स्थित्यै ।

(26)[P11] 7.4.3.3(18)- त्रिणवः । भवति । विजित्यै ।

त्रिणवो भवति भवति त्रिणव स्त्रिणवो भवति विजित्यै विजित्यै भवति त्रिणव स्त्रिणवो भवति विजित्यै ।

(27)[P11] 7.4.3.3(18)- त्रिणवः ।

त्रिणव इति त्रि - नवः ।

(28)[P11] 7.4.3.3(19)- भवति । विजित्यै । एकवि(ग्म्)शः ।

भवति विजित्यै विजित्यै भवति भवति विजित्या एकवि(ग्म्)श एकवि(ग्म्)शो विजित्यै भवति भवति विजित्या एकवि(ग्म्)शः ।

(29)[P11] 7.4.3.3(20)- विजित्यै । एकवि(ग्म्)शः । भवति ।

विजित्या एकवि(ग्म्)श एकवि(ग्म्)शो विजित्यै विजित्या एकवि(ग्म्)शो भवति भव त्येकवि(ग्म्)शो विजित्यै विजित्या एकवि(ग्म्)शो भवति ।

(30)[P11] 7.4.3.3(20)- विजित्यै ।

विजित्या इति वि - जित्यै ।

(31)[P11] 7.4.3.3(21)– एकवि(ग्म्)शः । भवति । प्रतिष्ठित्यै ।

एकवि(ग्म्)शो भवति भव त्येकवि(ग्म्)श एकवि(ग्म्)शो भवति प्रतिष्ठित्यै प्रतिष्ठित्यै भव त्येकवि(ग्म्)श एकवि(ग्म्)शो भवति प्रतिष्ठित्यै ।

(32)[P11] 7.4.3.3(21)– एकवि(ग्म्)शः ।

एकवि(ग्म्)श इत्येक – वि(ग्म्)शः ।

(33)[P11] 7.4.3.3(22)– भवति । प्रतिष्ठित्यै । अथो ।

भवति प्रतिष्ठित्यै प्रतिष्ठित्यै भवति भवति प्रतिष्ठित्या अथो अथो प्रतिष्ठित्यै भवति भवति प्रतिष्ठित्या अथो ।

(34)[P11] 7.4.3.3(23)– प्रतिष्ठित्यै । अथो । रुचम् ।

(10)[P22] 7.4.6.1(8)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

(11)[P22] 7.4.6.1(9)- लोकम् । न । प्र ।

लोकन् न न लोकम् ँलोकन् न प्र प्र ण लोकम् ँलोकन् न प्र ।

(12)[P22] 7.4.6.1(10)- न । प्र । अजानन्न् ।

न प्र प्र ण न प्राजानन् नजानन् प्र ण न प्राजानन्न् ।

(13)[P22] 7.4.6.1(11)- प्र । अजानन्न् । न ।

प्राजानन् नजानन् प्र प्राजानन् न नाजानन् प्र प्राजानन् न ।

(14)[P22] 7.4.6.1(12)- अजानन्न् । न । सुवर्गम् ।

अजानन् न नाजानन् नजानन् न सुवर्ग(ग्म्) सुवर्गन् नाजानन् नजानन् न सुवर्गम् ।

(15)[P22] 7.4.6.1(13)- न । सुवर्गम् । लोकम् ।

न सुवर्ग(ग्म्) सुवर्गन् न न सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्गन् न न सुवर्गम् ँलोकम् ।

(16)[P22] 7.4.6.1(14)- सुवर्गम् । लोकम् । आयन्न् ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मायन् नायन् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मायन्न् ।

(17)[P22] 7.4.6.1(14)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

(18)[P22] 7.4.6.1(15)– लोकम् । आयन्न् । ते ।

लोक मायन् नायन् ँल्लोकम् ँल्लोक मायन् ते त आयन् ँल्लोकम् ँल्लोक मायन् ते ।

(19)[P22] 7.4.6.1(16)– आयन्न् । ते । एतम् ।

आयन् ते त आयन् नायन् त एत मेतम् त आयन् नायन् त एतम् ।

(20)[P22] 7.4.6.1(17)– ते । एतम् । षट्त्रि(ग्म्)शद्रात्रम् ।

त एत मेतम् ते त एत(ग्म्) षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मेतम् ते त एत(ग्म्) षट्त्रि(ग्म्)शद्रात्रम् ।

(21)[P22] 7.4.6.1(18)– एतम् । षट्त्रि(ग्म्)शद्रात्रम् । अपश्यन्न् ।

एत(ग्म्) षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मेत मेत(ग्म्) षट्त्रि(ग्म्)शद्रात्र मपश्यन् नपश्यन् थ्षट्त्रि(ग्म्)शद्रात्र मेत मेत(ग्म्) षट्त्रि(ग्म्)शद्रात्र मपश्यन्न् ।

(22)[P22] 7.4.6.1(19)– षट्त्रि(ग्म्)शद्रात्रम् । अपश्यन्न् । तम् ।

षट्त्रि(ग्म्)शद्रात्र मपश्यन् नपश्यन् थ्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मपश्यन् तम् त मपश्यन् थ्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मपश्यन् तम् ।

(23)[P22] 7.4.6.1(19)– षट्त्रि(ग्म्)शद्रात्रम् ।

षट्त्रि(ग्म्)शद्रात्रमिति षट्त्रि(ग्म्)शत् – रात्रम् ।

(24)[P22] 7.4.6.1(20)– अपश्यन्न् । तम् । आ ।

अपश्यन् तम् त मपश्यन् नपश्यन् त मा त मपश्यन् नपश्यन् त मा ।

(25)[P22] 7.4.6.1(21)– तम् । आ । अहरन्न् ।

त मा तम् त मा ऽहरन् नहरन् ना तम् त मा ऽहरन्न् ।

(26)[P22] 7.4.6.1(22)– आ । अहरन्न् । तेन ।

आ ऽहरन् नहरन् ना ऽहरन् तेन तेना हरन् ना ऽहरन् तेन ।

(27)[P22] 7.4.6.1(23)- अहरन्न् । तेन । अयजन्त ।

अहरन् तेन तेना हरन् नहरन् तेना यजन्ता यजन्त तेना हरन् नहरन् तेना यजन्त ।

(28)[P22] 7.4.6.1(24)- तेन । अयजन्त । ततः ।

तेना यजन्ता यजन्त तेन तेना यजन्त तत स्ततो ऽयजन्त तेन तेना यजन्त ततः ।

(29)[P22] 7.4.6.1(25)- अयजन्त । ततः । वै ।

अयजन्त तत स्ततो ऽयजन्ता यजन्त ततो वै वै ततो ऽयजन्ता यजन्त ततो वै ।

(30)[P22] 7.4.6.1(26)- ततः । वै । ते ।

ततो वै वै तत स्ततो वै ते ते वै तत स्ततो वै ते ।

(31)[P22] 7.4.6.1(27)- वै । ते । सुवर्गम् ।

वै ते ते वै वै ते सुवर्ग(ग्म्) सुवर्गम् ते वै वै ते सुवर्गम् ।

(32)[P22] 7.4.6.1(28)- ते । सुवर्गम् । लोकम् ।

ते सुवर्ग(ग्म्) सुवर्गम् ते ते सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्गम् ते ते सुवर्गम् ँलोकम् ।

(33)[P22] 7.4.6.1(29)- सुवर्गम् । लोकम् । प्र ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकम् प्र प्र लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकम् प्र ।

(34)[P22] 7.4.6.1(29)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

(35)[P22] 7.4.6.1(30)- लोकम् । प्र । अजानन्न् ।

लोकम् प्र प्र लोकम् ँलोकम् प्रा जानन् नजानन् प्र लोकम् ँलोकम् प्रा जानन्न् ।

(36)[P22] 7.4.6.1(31)- प्र । अजानन्न् । सुवर्गम् ।

प्रा जानन् नजानन् प्र प्रा जानन् थ्सुवर्ग(ग्म्) सुवर्ग मजानन् प्र प्रा जानन् थ्सुवर्गम् ।

(37)[P22] 7.4.6.1(32)– अजानन्न् । सुवर्गम् । लोकम् ।

अजानन् थ्सुवर्ग(ग्म्) सुवर्ग मजानन् नजानन् थ्सुवर्गम् ँल्लोकम् ँल्लोक(ग्म्) सुवर्ग मजानन् नजानन् थ्सुवर्गम् ँल्लोकम् ।

(38)[P22] 7.4.6.1(33)– सुवर्गम् । लोकम् । आयन्न् ।

सुवर्गम् ँल्लोकम् ँल्लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँल्लोक मायन् नायन् ँल्लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँल्लोक मायन्न् ।

(39)[P22] 7.4.6.1(33)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(40)[P22] 7.4.6.1(34)– लोकम् । आयन्न् । ये ।

लोक मायन् नायन् ँल्लोकम् ँल्लोक मायन्. ये य आयन् ँल्लोकम् ँल्लोक मायन्. ये ।

(41)[P22] 7.4.6.1(35)– आयन्न् । ये । एवम् ।

आयन्. ये य आयन् नायन्. य एव मेवं ँय आयन् नायन्. य एवम् ।

(42)[P22] 7.4.6.1(36)– ये । एवम् । विद्वा(ग्म्)सः ।

य एव मेवं ँये य एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एवं ँये य एवं ँविद्वा(ग्म्)सः ।

(43)[P22] 7.4.6.1(37)– एवम् । विद्वा(ग्म्)सः । षट्त्रि(ग्म्)शद्रात्रम् ।

एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्रम् ।

(44)[P22] 7.4.6.1(38)– विद्वा(ग्म्)सः । षट्त्रि(ग्म्)शद्रात्रम् । आसते ।

विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र मासत आसते षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र मासते ।

(45)[P22] 7.4.6.1(39)- ष॒ट्त्रि॒(ग्म्)॒श॒द्रा॒त्रम् । आस॑ते । सु॒व॒र्गम् ।

ष॒ट्त्रि॒(ग्म्)॒श॒द्रा॒त्र मास॑त॒ आस॑ते षट्त्रि(ग्म्)शद्रा॒त्र(ग्म्) ष॑ट्त्रि(ग्म्)शद्रा॒त्र मास॑ते सु॒व॒र्ग(ग्म्) सु॑व॒र्ग मास॑ते षट्त्रि(ग्म्)शद्रा॒त्र(ग्म्) ष॑ट्त्रि(ग्म्)शद्रा॒त्र मास॑ते सु॒व॒र्गम् ।

(46)[P22] 7.4.6.1(39)- ष॒ट्त्रि॒(ग्म्)॒श॒द्रा॒त्रम् ।

ष॒ट्त्रि॒(ग्म्)॒श॒द्रा॒त्रमिति॑ षट्त्रि(ग्म्)शत् - रा॒त्रम् ।

(47)[P22] 7.4.6.1(40)- आस॑ते । सु॒व॒र्गम् । ए॒व ।

आस॑ते सु॒व॒र्ग(ग्म्) सु॑व॒र्ग मास॑त॒ आस॑ते सु॒व॒र्ग मे॒वैव सु॑व॒र्ग मास॑त॒ आस॑ते सु॒व॒र्ग मे॒व ।

(48)[P22] 7.4.6.1(41)- सु॒व॒र्गम् । ए॒व । लो॒कम् ।

सु॒व॒र्ग मे॒वैव सु॑व॒र्ग(ग्म्) सु॑व॒र्ग मे॒व लो॒कम् ँलो॒क मे॒व सु॑व॒र्ग(ग्म्) सु॑व॒र्ग मे॒व लो॒कम् ।

(49)[P22] 7.4.6.1(41)- सु॒व॒र्गम् ।

सु॒व॒र्गमिति॑ सुवः - गम् ।

(50)[P22] 7.4.6.1(42)- ए॒व । लो॒कम् । प्र ।

ए॒व लो॒कम् ँलो॒क मे॒वैव लो॒कम् प्र प्र लो॒क मे॒वैव लो॒कम् प्र ।

(51)[P22] 7.4.6.1(43)- लो॒कम् । प्र । जा॒न॒न्ति॒ ।

लो॒कम् प्र प्र लो॒कम् ँलो॒कम् प्र जा॑नन्ति जानन्ति॒ प्र लो॒कम् ँलो॒कम् प्र जा॑नन्ति ।

(52)[P22] 7.4.6.1(44)- प्र । जा॒न॒न्ति॒ । सु॒व॒र्गम् ।

प्र जा॑नन्ति जानन्ति॒ प्र प्र जा॑नन्ति सु॒व॒र्ग(ग्म्) सु॑व॒र्गम् जा॑नन्ति॒ प्र प्र जा॑नन्ति सु॒व॒र्गम् ।

(53)[P22] 7.4.6.1(45)- जा॒न॒न्ति॒ । सु॒व॒र्गम् । लो॒कम् ।

जा॒न॒न्ति॒ सु॒व॒र्ग(ग्म्) सु॑व॒र्गम् जा॑नन्ति जानन्ति सु॒व॒र्गम् ँलो॒कम् ँलो॒क(ग्म्) सु॑व॒र्गम् जा॑नन्ति जानन्ति सु॒व॒र्गम् ँलो॒कम् ।

(54)[P22] 7.4.6.1(46)– सुवर्गम् । लोकम् । यन्ति ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकं ँयन्ति यन्ति लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोकं ँयन्ति ।

(55)[P22] 7.4.6.1(46)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(56)[P22] 7.4.6.1(47)– लोकम् । यन्ति । ज्योतिः ।

लोकं ँयन्ति यन्ति लोकम् ँलोकं ँयन्ति ज्योतिर् ज्योतिर् यन्ति लोकम् ँलोकं ँयन्ति ज्योतिः ।

(57)[P22] 7.4.6.1(48)– यन्ति । ज्योतिः । अतिरात्रः ।

यन्ति ज्योतिर् ज्योतिर् यन्ति यन्ति ज्योति रतिरात्रो ऽतिरात्रो ज्योतिर् यन्ति यन्ति ज्योति रतिरात्रः ।

(58)[P22] 7.4.6.1(49)– ज्योतिः । अतिरात्रः । भवति ।

ज्योति रतिरात्रो ऽतिरात्रो ज्योतिर् ज्योति रतिरात्रो भवति भव त्यतिरात्रो ज्योतिर् ज्योति रतिरात्रो भवति ।

(59)[P22] 7.4.6.1(50)– अतिरात्रः । भवति । ज्योतिः ।

अतिरात्रो भवति भव त्यतिरात्रो ऽतिरात्रो भवति ज्योतिर् ज्योतिर् भव त्यतिरात्रो ऽतिरात्रो भवति ज्योतिः ।

(60)[P22] 7.4.6.1(50)– अतिरात्रः ।

अतिरात्र इत्यति – रात्रः ।

(1)[P23] 7.4.6.2(1)– भवति । ज्योतिः । एव ।

भवति ज्योतिर् ज्योतिर् भवति भवति ज्योति रेवैव ज्योतिर् भवति भवति ज्योति रेव ।

(2)[P23] 7.4.6.2(2)- ज्योतिः । एव । पुरस्तात् ।

ज्योति रेवैव ज्योतिर् ज्योति रेव पुरस्तात् पुरस्ता देव ज्योतिर् ज्योति रेव पुरस्तात् ।

(3)[P23] 7.4.6.2(3)- एव । पुरस्तात् । दधते ।

एव पुरस्तात् पुरस्ता देवैव पुरस्ताद् दधते दधते पुरस्ता देवैव पुरस्ताद् दधते ।

(4)[P23] 7.4.6.2(4)- पुरस्तात् । दधते । सुवर्गस्य ।

पुरस्ताद् दधते दधते पुरस्तात् पुरस्ताद् दधते सुवर्गस्य सुवर्गस्य दधते पुरस्तात् पुरस्ताद् दधते सुवर्गस्य ।

(5)[P23] 7.4.6.2(5)- दधते । सुवर्गस्य । लोकस्य ।

दधते सुवर्गस्य सुवर्गस्य दधते दधते सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य दधते दधते सुवर्गस्य लोकस्य ।

(6)[P23] 7.4.6.2(6)- सुवर्गस्य । लोकस्य । अनुख्यात्यै ।

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या नुख्यात्या अनुख्यात्यै लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या नुख्यात्यै ।

(7)[P23] 7.4.6.2(6)- सुवर्गस्य ।

सुवर्गस्येति सुवः - गस्य ।

(8)[P23] 7.4.6.2(7)- लोकस्य । अनुख्यात्यै । षडहाः ।

लोकस्या नुख्यात्या अनुख्यात्यै लोकस्य लोकस्या नुख्यात्यै षडहा ष्षडहा अनुख्यात्यै लोकस्य लोकस्या नुख्यात्यै षडहाः ।

(9)[P23] 7.4.6.2(8)- अनुख्यात्यै । षडहाः । भवन्ति ।

अनुख्यात्यै षडहा ष्षडहा अनुख्यात्या अनुख्यात्यै षडहा भवन्ति भवन्ति षडहा अनुख्यात्या अनुख्यात्यै षडहा भवन्ति ।

(10)[P23] 7.4.6.2(8)- अनुख्यात्यै ।

अनुख्यात्या इत्यनु - ख्यात्यै ।

(11)[P23] 7.4.6.2(9)- षडहाः । भवन्ति । षट् ।

षडहा भवन्ति भवन्ति षडहा ष्षडहा भवन्ति षट् थ्षड् भवन्ति षडहा ष्षडहा भवन्ति षट् ।

(12)[P23] 7.4.6.2(9)- षडहाः ।

षडहा इति षट् - अहाः ।

(13)[P23] 7.4.6.2(10)- भवन्ति । षट् । वै ।

भवन्ति षट् थ्षड् भवन्ति भवन्ति षड् वै वै षड् भवन्ति भवन्ति षड् वै ।

(14)[P23] 7.4.6.2(11)- षट् । वै । ऋतवः ।

षड् वै वै षट् थ्षड् वा ऋतव ऋतवो वै षट् थ्षड् वा ऋतवः ।

(15)[P23] 7.4.6.2(12)- वै । ऋतवः । ऋतुषु ।

वा ऋतव ऋतवो वै वा ऋतव ऋतुष् वृतुष् वृतवो वै वा ऋतव ऋतुषु ।

(16)[P23] 7.4.6.2(13)- ऋतवः । ऋतुषु । एव ।

ऋतव ऋतुष् वृतुष् वृतव ऋतव ऋतुष् वेवैव र्तुष् वृतव ऋतव ऋतु ष्वेव ।

(17)[P23] 7.4.6.2(14)- ऋतुषु । एव । प्रति ।

ऋतु ष्वेवैव र्तुष् वृतु ष्वेव प्रति प्रत्येव र्तुष् वृतु ष्वेव प्रति ।

(18)[P23] 7.4.6.2(15)- एव । प्रति । तिष्ठन्ति ।

एव प्रति प्रत्येवैव प्रति तिष्ठन्ति तिष्ठन्ति प्रत्येवैव प्रति तिष्ठन्ति ।

(19)[P23] 7.4.6.2(16)- प्रति । तिष्ठन्ति । चत्वारः ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्ति चत्वार श्चत्वार स्तिष्ठन्ति प्रति प्रति तिष्ठन्ति चत्वारः ।

(20)[P23] 7.4.6.2(17)- तिष्ठन्ति । चत्वारः । भवन्ति ।

तिष्ठन्ति चत्वार श्चत्वार स्तिष्ठन्ति तिष्ठन्ति चत्वारो भवन्ति भवन्ति चत्वार स्तिष्ठन्ति तिष्ठन्ति चत्वारो भवन्ति ।

(21)[P23] 7.4.6.2(18)- चत्वारः । भवन्ति । चतस्रः ।

चत्वारो भवन्ति भवन्ति चत्वार श्चत्वारो भवन्ति चतस्र श्चतस्रो भवन्ति चत्वार श्चत्वारो भवन्ति चतस्रः ।

(22)[P23] 7.4.6.2(19)- भवन्ति । चतस्रः । दिशः ।

भवन्ति चतस्र श्चतस्रो भवन्ति भवन्ति चतस्रो दिशो दिश श्चतस्रो भवन्ति भवन्ति चतस्रो दिशः ।

(23)[P23] 7.4.6.2(20)- चतस्रः । दिशः । दिक्षु ।

चतस्रो दिशो दिश श्चतस्र श्चतस्रो दिशो दिक्षु दिक्षु दिश श्चतस्र श्चतस्रो दिशो दिक्षु ।

(24)[P23] 7.4.6.2(21)- दिशः । दिक्षु । एव ।

दिशो दिक्षु दिक्षु दिशो दिशो दिक्ष्वेवैव दिक्षु दिशो दिशो दिक्ष्वेव ।

(25)[P23] 7.4.6.2(22)- दिक्षु । एव । प्रति ।

दिक्ष्वेवैव दिक्षु दिक्ष्वेव प्रति प्रत्येव दिक्षु दिक्ष्वेव प्रति ।

(26)[P23] 7.4.6.2(23)- एव । प्रति । तिष्ठन्ति ।

एव प्रति प्रत्येवैव प्रति तिष्ठन्ति तिष्ठन्ति प्रत्येवैव प्रति तिष्ठन्ति ।

(27)[P23] 7.4.6.2(24)- प्रति । तिष्ठन्ति । असत्रम् ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यसत्र मसत्रम् तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यसत्रम् ।

(28)[P23] 7.4.6.2(25)- तिष्ठन्ति । असत्रम् । वै ।

तिष्ठ न्त्यसत्र मसत्रम् तिष्ठन्ति तिष्ठ न्त्यसत्रं ँवै वा असत्रम् तिष्ठन्ति तिष्ठ न्त्यसत्रं ँवै ।

(29)[P23] 7.4.6.2(26)- अस॒त्रम् । वै । ए॒तत् ।

अस॒त्रं ँवै वा अस॒त्र मस॒त्रं ँवा ए॒त दे॒तद् वा अस॒त्र मस॒त्रं ँवा ए॒तत् ।

(30)[P23] 7.4.6.2(27)- वै । ए॒तत् । यत् ।

वा ए॒त दे॒तद् वै वा ए॒तद् यद् यदे॒तद् वै वा ए॒तद् यत् ।

(31)[P23] 7.4.6.2(28)- ए॒तत् । यत् । अ॒छ॒न्दो॒मम् ।

ए॒तद् यद् यदे॒त दे॒तद् यदछन्दो॒म मछन्दो॒मं ँयदे॒त दे॒तद् यदछन्दो॒मम् ।

(32)[P23] 7.4.6.2(29)- यत् । अ॒छ॒न्दो॒मम् । यत् ।

यदछन्दो॒म मछन्दो॒मं ँयद् यदछन्दो॒मं ँयद् यदछन्दो॒मं ँयद् यदछन्दो॒मं ँयत् ।

(33)[P23] 7.4.6.2(30)- अ॒छ॒न्दो॒मम् । यत् । छ॒न्दो॒माः ।

अ॒छ॒न्दो॒मं ँयद् यदछन्दो॒म मछन्दो॒मं ँयच् छन्दो॒मा श्छन्दो॒मा यदछन्दो॒म मछन्दो॒मं ँयच् छन्दो॒माः ।

(34)[P23] 7.4.6.2(30)- अ॒छ॒न्दो॒मम् ।

अ॒छ॒न्दो॒ममित्यछन्दः - मम् ।

(35)[P23] 7.4.6.2(31)- यत् । छ॒न्दो॒माः । भव॑न्ति ।

यच् छन्दो॒मा श्छन्दो॒मा यद् यच् छन्दो॒मा भवन्ति॒ भवन्ति छन्दो॒मा यद् यच् छन्दो॒मा भवन्ति ।

(36)[P23] 7.4.6.2(32)- छ॒न्दो॒माः । भवन्ति । तेन ।

छ॒न्दो॒मा भवन्ति॒ भवन्ति छन्दो॒मा श्छन्दो॒मा भवन्ति॒ ते॒न ते॒न भवन्ति छन्दो॒मा श्छन्दो॒मा भवन्ति॒ तेन ।

(37)[P23] 7.4.6.2(32)- छ॒न्दो॒माः ।

छ॒न्दो॒मा इति छन्दः - माः ।

(38)[P23] 7.4.6.2(33)- भवन्ति । तेन । सत्रम् ।

भवन्ति तेन तेन भवन्ति भवन्ति तेन सत्र(ग्म्) सत्रम् तेन भवन्ति भवन्ति तेन सत्रम् ।

(39)[P23] 7.4.6.2(34)- तेन । सत्रम् । देवताः ।

तेन सत्र(ग्म्) सत्रम् तेन तेन सत्रम् देवता देवताः सत्रम् तेन तेन सत्रम् देवताः ।

(40)[P23] 7.4.6.2(35)- सत्रम् । देवताः । एव ।

सत्रम् देवता देवताः सत्र(ग्म्) सत्रम् देवता एवैव देवताः सत्र(ग्म्) सत्रम् देवता एव ।

(41)[P23] 7.4.6.2(36)- देवताः । एव । पृष्ठैः ।

देवता एवैव देवता देवता एव पृष्ठैः पृष्ठै रेव देवता देवता एव पृष्ठैः ।

(42)[P23] 7.4.6.2(37)- एव । पृष्ठैः । अव ।

एव पृष्ठैः पृष्ठै रेवैव पृष्ठै रवाव पृष्ठै रेवैव पृष्ठै रव ।

(43)[P23] 7.4.6.2(38)- पृष्ठैः । अव । रुन्धते ।

पृष्ठै रवाव पृष्ठैः पृष्ठै रव रुन्धते रुन्धते ऽव पृष्ठैः पृष्ठै रव रुन्धते ।

(44)[P23] 7.4.6.2(39)- अव । रुन्धते । पशून् ।

अव रुन्धते रुन्धते ऽवाव रुन्धते पशून् पशून् रुन्धते ऽवाव रुन्धते पशून् ।

(45)[P23] 7.4.6.2(40)- रुन्धते । पशून् । छन्दोमैः ।

रुन्धते पशून् पशून् रुन्धते रुन्धते पशून् छन्दोमै श्छन्दोमैः पशून् रुन्धते रुन्धते पशून् छन्दोमैः ।

(46)[P23] 7.4.6.2(41)- पशून् । छन्दोमैः । ओजः ।

पशून् छन्दोमै श्छन्दोमैः पशून् पशून् छन्दोमै रोज ओज श्छन्दोमैः पशून् पशून् छन्दोमै रोजः ।

(47)[P23] 7.4.6.2(42)– छन्दोमैः । ओजः । वै ।

छन्दोमै रोज ओज श्छन्दोमै श्छन्दोमै रोजो वै वा ओज श्छन्दोमै श्छन्दोमै रोजो वै ।

(48)[P23] 7.4.6.2(42)– छन्दोमैः ।

छन्दोमैरिति छन्दः – मैः ।

(49)[P23] 7.4.6.2(43)– ओजः । वै । वीर्यम् ।

ओजो वै वा ओज ओजो वै वीर्यं ँवीर्यं ँवा ओज ओजो वै वीर्यम् ।

(50)[P23] 7.4.6.2(44)– वै । वीर्यम् । पृष्ठानि ।

वै वीर्यं ँवीर्यं ँवै वै वीर्यम् पृष्ठानि पृष्ठानि वीर्यं ँवै वै वीर्यम् पृष्ठानि ।

(51)[P23] 7.4.6.2(45)– वीर्यम् । पृष्ठानि । पशवः ।

वीर्यम् पृष्ठानि पृष्ठानि वीर्यं ँवीर्यम् पृष्ठानि पशवः पशवः पृष्ठानि वीर्यं ँवीर्यम् पृष्ठानि पशवः ।

(52)[P23] 7.4.6.2(46)– पृष्ठानि । पशवः । छन्दोमाः ।

पृष्ठानि पशवः पशवः पृष्ठानि पृष्ठानि पशव श्छन्दोमा श्छन्दोमाः पशवः पृष्ठानि पृष्ठानि पशव श्छन्दोमाः ।

(53)[P23] 7.4.6.2(47)– पशवः । छन्दोमाः । ओजसि ।

पशव श्छन्दोमा श्छन्दोमाः पशवः पशव श्छन्दोमा ओज स्योजसि छन्दोमाः पशवः पशव श्छन्दोमा ओजसि ।

(54)[P23] 7.4.6.2(48)– छन्दोमाः । ओजसि । एव ।

छन्दोमा ओज स्योजसि छन्दोमा श्छन्दोमा ओज स्येवै वौजसि छन्दोमा श्छन्दोमा ओज स्येव ।

(55)[P23] 7.4.6.2(48)- छ॒न्दो॒माः ।

छ॒न्दो॒मा इति॑ छन्दः - माः ।

(56)[P23] 7.4.6.2(49)- ओज॑सि । ए॒व । वी॒र्ये᳚ ।

ओज॑ स्ये॒वै वौज॒ स्योज॑स्ये॒व वी॒र्ये॑ वी॒र्य॑ ए॒वौज॒ स्योज॑ स्ये॒व वी॒र्ये᳚ ।

(57)[P23] 7.4.6.2(50)- ए॒व । वी॒र्ये᳚ । प॒शुषु॑ ।

ए॒व वी॒र्ये॑ वी॒र्य॑ ए॒वैव वी॒र्ये॑ प॒शुषु॑ प॒शुषु॑ वी॒र्य॑ ए॒वैव वी॒र्ये॑ प॒शुषु॑ ।

(1)[P24] 7.4.6.3(1)- वी॒र्ये᳚ । प॒शुषु॑ । प्रति॑ ।

वी॒र्ये॑ प॒शुषु॑ प॒शुषु॑ वी॒र्ये॑ वी॒र्ये॑ प॒शु॒षु॒ प्रति॒ प्रति॑ प॒शुषु॑ वी॒र्ये॑ वी॒र्ये॑ प॒शु॒षु॒ प्रति॑ ।

(2)[P24] 7.4.6.3(2)- प॒शुषु॑ । प्रति॑ । ति॒ष्ठ॒न्ति॒ ।

प॒शु॒षु॒ प्रति॒ प्रति॑ प॒शुषु॑ प॒शु॒षु॒ प्रति॑ तिष्ठन्ति तिष्ठन्ति॒ प्रति॑ प॒शुषु॑ प॒शु॒षु॒ प्रति॑ तिष्ठन्ति ।

(3)[P24] 7.4.6.3(3)- प्रति॑ । ति॒ष्ठ॒न्ति॒ । ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्रः ।

प्रति॑ तिष्ठन्ति तिष्ठन्ति॒ प्रति॒ प्रति॑ तिष्ठन्ति षट्त्रि(ग्म्)शद्रा॒त्र ष्षट्त्रि(ग्म्)शद्रा॒त्र स्तिष्ठन्ति॒ प्रति॒ प्रति॑ तिष्ठन्ति षट्त्रि(ग्म्)शद्रा॒त्रः ।

(4)[P24] 7.4.6.3(4)- ति॒ष्ठ॒न्ति॒ । ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्रः । भ॒व॒ति॒ ।

ति॒ष्ठ॒न्ति॒ ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्र ष्षट्त्रि(ग्म्)शद्रा॒त्र स्तिष्ठन्ति तिष्ठन्ति षट्त्रि(ग्म्)शद्रा॒त्रो भ॑वति भवति षट्त्रि(ग्म्)शद्रा॒त्र स्तिष्ठन्ति तिष्ठन्ति षट्त्रि(ग्म्)शद्रा॒त्रो भ॑वति ।

(5)[P24] 7.4.6.3(5)- ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्रः । भ॒व॒ति॒ । षट्त्रि(ग्म्)शद॑क्षरा ।

ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्रो भ॑वति भवति षट्त्रि(ग्म्)शद्रा॒त्र ष्षट्त्रि(ग्म्)शद्रा॒त्रो भ॑वति॒ षट्त्रि(ग्म्)शद॑क्षरा॒ षट्त्रि(ग्म्)शद॑क्षरा भवति षट्त्रि(ग्म्)शद्रा॒त्र ष्षट्त्रि(ग्म्)शद्रा॒त्रो भ॑वति॒ षट्त्रि(ग्म्)शद॑क्षरा ।

(6)[P24] 7.4.6.3(5)- ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्रः ।

ष॒ट्त्रि॒(ग्म्॒)श॒द्रा॒त्र इति॑ षट्त्रि(ग्म्)शत् - रा॒त्रः ।

(7)[P24] 7.4.6.3(6)– भवति । षट्त्रि(ग्म्)शदक्षरा । बृहती ।

भवति षट्त्रि(ग्म्)शदक्षरा षट्त्रि(ग्म्)शदक्षरा भवति भवति षट्त्रि(ग्म्)शदक्षरा बृहती बृहती षट्त्रि(ग्म्)शदक्षरा भवति भवति षट्त्रि(ग्म्)शदक्षरा बृहती ।

(8)[P24] 7.4.6.3(7)– षट्त्रि(ग्म्)शदक्षरा । बृहती । बार्.हताः ।

षट्त्रि(ग्म्)शदक्षरा बृहती बृहती षट्त्रि(ग्म्)शदक्षरा षट्त्रि(ग्म्)शदक्षरा बृहती बार्.हता बार्.हता बृहती षट्त्रि(ग्म्)शदक्षरा षट्त्रि(ग्म्)शदक्षरा बृहती बार्.हताः ।

(9)[P24] 7.4.6.3(7)– षट्त्रि(ग्म्)शदक्षरा ।

षट्त्रि(ग्म्)शदक्षरेति षट्त्रि(ग्म्)शत् – अक्षरा ।

(10)[P24] 7.4.6.3(8)– बृहती । बार्.हताः । पशवः ।

बृहती बार्.हता बार्.हता बृहती बृहती बार्.हताः पशवः पशवो बार्.हता बृहती बृहती बार्.हताः पशवः ।

(11)[P24] 7.4.6.3(9)– बार्.हताः । पशवः । बृहत्या ।

बार्.हताः पशवः पशवो बार्.हता बार्.हताः पशवो बृहत्या बृहत्या पशवो बार्.हता बार्.हताः पशवो बृहत्या ।

(12)[P24] 7.4.6.3(10)– पशवः । बृहत्या । एव ।

पशवो बृहत्या बृहत्या पशवः पशवो बृहत्यैवैव बृहत्या पशवः पशवो बृहत्यैव ।

(13)[P24] 7.4.6.3(11)– बृहत्या । एव । पशून् ।

बृहत्यैवैव बृहत्या बृहत्यैव पशून् पशू नेव बृहत्या बृहत्यैव पशून् ।

(14)[P24] 7.4.6.3(12)– एव । पशून् । अव ।

एव पशून् पशूनेवैव पशू नवाव पशूनेवैव पशूनव ।

(15)[P24] 7.4.6.3(13)- प॒शून् । अव॑ । रु॒न्ध॒ते॒ ।

प॒शूनवाव॑ प॒शून् प॒शूनव॑ रुन्धते रुन्ध॒ते ऽव॑ प॒शून् प॒शूनव॑ रुन्धते ।

(16)[P24] 7.4.6.3(14)- अव॑ । रु॒न्ध॒ते॒ । बृ॒ह॒ती ।

अव॑ रुन्धते रुन्ध॒ते ऽवाव॑ रुन्धते बृह॒ती बृ॑ह॒ती रु॑न्ध॒ते ऽवाव॑ रुन्धते बृह॒ती ।

(17)[P24] 7.4.6.3(15)- रु॒न्ध॒ते॒ । बृ॒ह॒ती । छन्द॑साम् ।

रु॒न्ध॒ते॒ बृ॒ह॒ती बृ॑ह॒ती रु॑न्धते रुन्धते बृह॒ती छन्द॑सा॒म् छन्द॑साम् बृह॒ती रु॑न्धते रुन्धते बृह॒ती
छन्द॑साम् ।

(18)[P24] 7.4.6.3(16)- बृ॒ह॒ती । छन्द॑साम् । स्वारा᳚ज्यम् ।

बृ॒ह॒ती छन्द॑सा॒म् छन्द॑साम् बृह॒ती बृ॑ह॒ती छन्द॑सा॒(गग्॒) स्वारा᳚ज्य॒(गग्॒) स्वारा᳚ज्य॒म् छन्द॑साम् बृह॒ती
बृ॑ह॒ती छन्द॑सा॒(गग्॒) स्वारा᳚ज्यम् ।

(19)[P24] 7.4.6.3(17)- छन्द॑साम् । स्वारा᳚ज्यम् । आ॒श्नु॒त॒ ।

छन्द॑सा॒(गग्॒) स्वारा᳚ज्य॒(गग्॒) स्वारा᳚ज्य॒म् छन्द॑सा॒म् छन्द॑सा॒(गग्॒) स्वारा᳚ज्य माश्नुता श्नु॒त॒
स्वारा᳚ज्य॒म् छन्द॑सा॒म् छन्द॑सा॒(गग्॒) स्वारा᳚ज्य माश्नुत ।

(20)[P24] 7.4.6.3(18)- स्वारा᳚ज्यम् । आ॒श्नु॒त॒ । अ॒श्नु॒व॒ते᳚ । (GS-7.4-14)

स्वारा᳚ज्य माश्नुता श्नु॒त॒ स्वारा᳚ज्य॒(गग्॒) स्वारा᳚ज्य माश्नुता श्नु॒व॒ते᳚ ऽश्नु॒व॒त॑ आश्नु॒त॒
स्वारा᳚ज्य॒(गग्॒) स्वारा᳚ज्य माश्नुता श्नु॒व॒ते᳚ ।

(21)[P24] 7.4.6.3(18)- स्वारा᳚ज्यम् । (GS-7.4-14)

स्वारा᳚ज्य॒मिति॒ स्व - रा॒ज्य॒म् ।

(22)[P24] 7.4.6.3(19)- आ॒श्नु॒त॒ । अ॒श्नु॒व॒ते᳚ । स्वारा᳚ज्यम् । (GS-7.4-14)

आ॒श्नु॒ता॒ श्नु॒व॒ते᳚ ऽश्नु॒व॒त॑ आश्नुता श्नुता श्नु॒व॒ते॒ स्वारा᳚ज्य॒(गग्॒) स्वारा᳚ज्य मश्नु॒व॒त॑
आश्नुता श्नुता श्नु॒व॒ते॒ स्वारा᳚ज्यम् ।

(23)[P24] 7.4.6.3(20)– अश्नुवते । स्वाराज्यम् । ये । (GS–7.4–14)

अश्नुवते स्वाराज्य(गग्) स्वाराज्य मश्नुवते ऽश्नुवते स्वाराज्यं ँये ये स्वाराज्य मश्नुवते ऽश्नुवते स्वाराज्यं ँये ।

(24)[P24] 7.4.6.3(21)– स्वाराज्यम् । ये । एवम् । (GS–7.4–14)

स्वाराज्यं ँये ये स्वाराज्य(गग्) स्वाराज्यं ँय एव मेवं ँये स्वाराज्य(गग्) स्वाराज्यं ँय एवम् ।

(25)[P24] 7.4.6.3(21)– स्वाराज्यम् । (GS–7.4–14)

स्वाराज्यमिति स्व – राज्यम् ।

(26)[P24] 7.4.6.3(22)– ये । एवम् । विद्वा(ग्म्)सः ।

य एव मेवं ँये य एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एवं ँये य एवं ँविद्वा(ग्म्)सः ।

(27)[P24] 7.4.6.3(23)– एवम् । विद्वा(ग्म्)सः । षट्त्रि(ग्म्)शद्रात्रम् ।

एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्रम् ।

(28)[P24] 7.4.6.3(24)– विद्वा(ग्म्)सः । षट्त्रि(ग्म्)शद्रात्रम् । आसते ।

विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र मासत आसते षट्त्रि(ग्म्)शद्रात्रं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स ष्षट्त्रि(ग्म्)शद्रात्र मासते ।

(29)[P24] 7.4.6.3(25)– षट्त्रि(ग्म्)शद्रात्रम् । आसते । सुवर्गम् ।

षट्त्रि(ग्म्)शद्रात्र मासत आसते षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मासते सुवर्ग(ग्म्) सुवर्ग मासते षट्त्रि(ग्म्)शद्रात्र(ग्म्) षट्त्रि(ग्म्)शद्रात्र मासते सुवर्गम् ।

(30)[P24] 7.4.6.3(25)– षट्त्रि(ग्म्)शद्रात्रम् ।

षट्त्रि(ग्म्)शद्रात्रमिति षट्त्रि(ग्म्)शत् – रात्रम् ।

(31)[P24] 7.4.6.3(26)- आस॑ते । सु॒व॒र्गम् । ए॒व ।

आस॑ते सुव॒र्ग(ग्म्) सु॑व॒र्ग मास॑त॒ आस॑ते सुव॒र्ग मे॒वैव सु॑व॒र्ग मास॑त॒ आस॑ते सुव॒र्ग मे॒व ।

(32)[P24] 7.4.6.3(27)- सु॒व॒र्गम् । ए॒व । लो॒कम् ।

सु॒व॒र्ग मे॒वैव सु॑व॒र्ग(ग्म्) सु॑व॒र्ग मे॒व लो॒कम् ँलो॒क मे॒व सु॑व॒र्ग(ग्म्) सु॑व॒र्ग मे॒व लो॒कम् ।

(33)[P24] 7.4.6.3(27)- सु॒व॒र्गम् ।

सु॒व॒र्गमिति॑ सुवः – गम् ।

(34)[P24] 7.4.6.3(28)- ए॒व । लो॒कम् । य॒न्ति॒ ।

ए॒व लो॒कम् ँलो॒क मे॒वैव लो॒कं ँय॑न्ति यन्ति लो॒क मे॒वैव लो॒कं ँय॑न्ति ।

(35)[P24] 7.4.6.3(29)- लो॒कम् । य॒न्ति॒ । अ॒ति॒रा॒त्रौ ।

लो॒कं ँय॑न्ति यन्ति लो॒कम् ँलो॒कं ँय॑न्त्यतिरा॒त्रा व॑तिरा॒त्रौ य॑न्ति लो॒कम् ँलो॒कं ँय॑न्त्यतिरा॒त्रौ ।

(36)[P24] 7.4.6.3(30)- य॒न्ति॒ । अ॒ति॒रा॒त्रौ । अ॒भित॑ः ।

य॒न्त्य॒ति॒रा॒त्रा व॑तिरा॒त्रौ य॑न्ति यन्त्यतिरात्रा व॒भितो॒ ऽभितो॑ ऽतिरा॒त्रौ य॑न्ति यन्त्यतिरा॒त्रा व॒भित॑ः ।

(37)[P24] 7.4.6.3(31)- अ॒ति॒रा॒त्रौ । अ॒भित॑ः । भ॒व॒त॒ः ।

अ॒ति॒रा॒त्रा व॒भितो॒ ऽभितो॑ ऽतिरा॒त्रा व॑तिरा॒त्रा व॒भितो॑ भवतो भवतो॒ ऽभितो॑ ऽतिरा॒त्रा व॑तिरा॒त्रा व॒भितो॑ भवतः ।

(38)[P24] 7.4.6.3(31)- अ॒ति॒रा॒त्रौ ।

अ॒ति॒रा॒त्रावित्य॑ति – रा॒त्रौ ।

(39)[P24] 7.4.6.3(32)- अ॒भित॑ः । भ॒व॒त॒ः । सु॒व॒र्गस्य॑ ।

अ॒भितो॑ भवतो भवतो॒ ऽभितो॒ ऽभितो॑ भवतः सुव॒र्गस्य॑ सुव॒र्गस्य॑ भवतो॒ ऽभितो॒ ऽभितो॑ भवतः सुव॒र्गस्य॑ ।

(40)[P24] 7.4.6.3(33)– भवतः । सुवर्गस्य । लोकस्य ।

भवतः सुवर्गस्य सुवर्गस्य भवतो भवतः सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य भवतो भवतः सुवर्गस्य लोकस्य ।

(41)[P24] 7.4.6.3(34)– सुवर्गस्य । लोकस्य । परिगृहीत्यै ॥

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य परिगृहीत्यै परिगृहीत्यै लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य परिगृहीत्यै ।

(42)[P24] 7.4.6.3(34)– सुवर्गस्य ।

सुवर्गस्येति सुवः – गस्य ।

(43)[P24] 7.4.6.3(35)– लोकस्य । परिगृहीत्यै ॥

लोकस्य परिगृहीत्यै परिगृहीत्यै लोकस्य लोकस्य परिगृहीत्यै ।

(44)[P24] 7.4.6.3(36)– परिगृहीत्यै ॥

परिगृहीत्या इति परि – गृहीत्यै ।

=======

## 7.4.7 अनुवाकम् 7 – घनम्

(1)[P25] 7.4.7.1(1)– वसिष्ठः । हतपुत्रः । अकामयत ।

वसिष्ठो हतपुत्रो हतपुत्रो वसिष्ठो वसिष्ठो हतपुत्रो ऽकामयता कामयत हतपुत्रो वसिष्ठो वसिष्ठो हतपुत्रो ऽकामयत ।

(2)[P25] 7.4.7.1(2)– हतपुत्रः । अकामयत । विन्देय ।

हतपुत्रो ऽकामयता कामयत हतपुत्रो हतपुत्रो ऽकामयत विन्देय विन्देया कामयत हतपुत्रो हतपुत्रो ऽकामयत विन्देय ।

(3)[P25] 7.4.7.1(2)– हतपुत्रः ।

हतपुत्र इति हत – पुत्रः ।

(4)[P25] 7.4.7.1(3)– अकामयत । विन्देय । प्रजाम् ।

अकामयत विन्देय विन्देया कामयता कामयत विन्देय प्रजाम् प्रजां ँविन्देया कामयता कामयत विन्देय प्रजाम् ।

(5)[P25] 7.4.7.1(4)– विन्देय । प्रजाम् । अभि ।

विन्देय प्रजाम् प्रजां ँविन्देय विन्देय प्रजा मभ्यभि प्रजां ँविन्देय विन्देय प्रजा मभि ।

(6)[P25] 7.4.7.1(5)– प्रजाम् । अभि । सौदासान् ।

प्रजा मभ्यभि प्रजाम् प्रजा मभि सौदासान् थ्सौदासा नभि प्रजाम् प्रजा मभि सौदासान् ।

(7)[P25] 7.4.7.1(5)– प्रजाम् ।

प्रजामिति प्र – जाम् ।

(8)[P25] 7.4.7.1(6)– अभि । सौदासान् । भवेयम् ।

अभि सौदासान् थ्सौदासा नभ्यभि सौदासान् भवेयम् भवेय(ग्म्) सौदासा नभ्यभि सौदासान् भवेयम् ।

(9)[P25] 7.4.7.1(7)– सौदासान् । भवेयम् । इति ।

सौदासान् भवेयम् भवेय(ग्म्) सौदासान् थ्सौदासान् भवेय मितीति भवेय(ग्म्) सौदासान् थ्सौदासान् भवेय मिति ।

(10)[P25] 7.4.7.1(8)– भवेयम् । इति । सः ।

भवेय मितीति भवेयम् भवेय मिति स स इति भवेयम् भवेय मिति सः ।

(11)[P25] 7.4.7.1(9)– इति । सः । एतम् ।

इति स स इतीति स एत मेत(ग्म्) स इतीति स एतम् ।

(12)[P25] 7.4.7.1(10)– सः । एतम् । एकस्मान्नपञ्चाशम् ।

स एत मेत(ग्म्) स स एत मेकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मेत(ग्म्) स स एत मेकस्मान्नपञ्चाशम् ।

(13)[P25] 7.4.7.1(11)– एतम् । एकस्मान्नपञ्चाशम् । अपश्यत् ।

एत मेकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मेत मेत मेकस्मान्नपञ्चाश मपश्य दपश्य देकस्मान्नपञ्चाश मेत मेत मेकस्मान्नपञ्चाश मपश्यत् ।

(14)[P25] 7.4.7.1(12)– एकस्मान्नपञ्चाशम् । अपश्यत् । तम् ।

एकस्मान्नपञ्चाश मपश्य दपश्य देकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मपश्यत् तम् त मपश्य देकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मपश्यत् तम् ।

(15)[P25] 7.4.7.1(12)– एकस्मान्नपञ्चाशम् ।

एकस्मान्नपञ्चाशमित्येकस्मात् – नपञ्चाशम् ।

(16)[P25] 7.4.7.1(13)– अपश्यत् । तम् । आ ।

अपश्यत् तम् त मपश्य दपश्यत् त मा त मपश्य दपश्यत् त मा ।

(17)[P25] 7.4.7.1(14)- तम् । आ । अहरत् ।

त मा तम् त मा ऽहर दहरदा तम् त मा ऽहरत् ।

(18)[P25] 7.4.7.1(15)- आ । अहरत् । तेन ।

आ ऽहर दहरदा ऽहरत् तेन तेना हरदा ऽहरत् तेन ।

(19)[P25] 7.4.7.1(16)- अहरत् । तेन । अयजत ।

अहरत् तेन तेना हर दहरत् तेना यजता यजत तेना हर दहरत् तेना यजत ।

(20)[P25] 7.4.7.1(17)- तेन । अयजत । ततः ।

तेना यजता यजत तेन तेना यजत तत स्ततो ऽयजत तेन तेना यजत ततः ।

(21)[P25] 7.4.7.1(18)- अयजत । ततः । वै ।

अयजत तत स्ततो ऽयजता यजत ततो वै वै ततो ऽयजता यजत ततो वै ।

(22)[P25] 7.4.7.1(19)- ततः । वै । सः ।

ततो वै वै तत स्ततो वै स स वै तत स्ततो वै सः ।

(23)[P25] 7.4.7.1(20)- वै । सः । अविन्दत ।

वै स स वै वै सो ऽविन्दता विन्दत स वै वै सो ऽविन्दत ।

(24)[P25] 7.4.7.1(21)- सः । अविन्दत । प्रजाम् ।

सो ऽविन्दता विन्दत स सो ऽविन्दत प्रजाम् प्रजा मविन्दत स सो ऽविन्दत प्रजाम् ।

(25)[P25] 7.4.7.1(22)- अविन्दत । प्रजाम् । अभि ।

अविन्दत प्रजाम् प्रजा मविन्दता विन्दत प्रजा मभ्यभि प्रजा मविन्दता विन्दत प्रजा मभि ।

(26)[P25] 7.4.7.1(23)- प्रजाम् । अभि । सौदासान् ।

प्रजा मभ्यभि प्रजाम् प्रजा मभि सौदासान् थ्सौदासा नभि प्रजाम् प्रजा मभि सौदासान् ।

(27)[P25] 7.4.7.1(23)– प्रजाम् ।

प्रजामिति प्र – जाम् ।

(28)[P25] 7.4.7.1(24)– अभि । सौदासान् । अभवत् ।

अभि सौदासान् थ्सौदासा नभ्यभि सौदासा नभव दभवथ् सौदासा नभ्यभि सौदासा नभवत् ।

(29)[P25] 7.4.7.1(25)– सौदासान् । अभवत् । ये ।

सौदासा नभव दभवथ् सौदासान् थ्सौदासा नभवद् ये ये ऽभवथ् सौदासान् थ्सौदासा नभवद् ये ।

(30)[P25] 7.4.7.1(26)– अभवत् । ये । एवम् ।

अभवद् ये ये ऽभव दभवद् य एव मेवं ँये ऽभव दभवद् य एवम् ।

(31)[P25] 7.4.7.1(27)– ये । एवम् । विद्वा(ग्म्)सः ।

य एव मेवं ँये य एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एवं ँये य एवं ँविद्वा(ग्म्)सः ।

(32)[P25] 7.4.7.1(28)– एवम् । विद्वा(ग्म्)सः । एकस्मान्नपञ्चाशम् ।

एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाशं ँविद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एकस्मान्नपञ्चाशम् ।

(33)[P25] 7.4.7.1(29)– विद्वा(ग्म्)सः । एकस्मान्नपञ्चाशम् । आसते ।

विद्वा(ग्म्)स एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाशं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एकस्मान्नपञ्चाश मासत आसत एकस्मान्नपञ्चाशं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एकस्मान्नपञ्चाश मासते ।

(34)[P25] 7.4.7.1(30)– एकस्मान्नपञ्चाशम् । आसते । विन्दन्ते ।

एकस्मान्नपञ्चाश मासत आसत एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मासते विन्दन्ते विन्दन्त आसत एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मासते विन्दन्ते ।

(35)[P25] 7.4.7.1(30)– एकस्मान्नपञ्चाशम् ।

एकस्मान्नपञ्चाशमित्येकस्मात् – नपञ्चाशम् ।

(36)[P25] 7.4.7.1(31)– आसते । विन्दन्ते । प्रजाम् ।

आसते विन्दन्ते विन्दन्त आसत आसते विन्दन्ते प्रजाम् प्रजां ँविन्दन्त आसत आसते विन्दन्ते प्रजाम् ।

(37)[P25] 7.4.7.1(32)– विन्दन्ते । प्रजाम् । अभि ।

विन्दन्ते प्रजाम् प्रजां ँविन्दन्ते विन्दन्ते प्रजा मभ्यभि प्रजां ँविन्दन्ते विन्दन्ते प्रजा मभि ।

(38)[P25] 7.4.7.1(33)– प्रजाम् । अभि । भ्रातृव्यान् ।

प्रजा मभ्यभि प्रजाम् प्रजा मभि भ्रातृव्यान् भ्रातृव्या नभि प्रजाम् प्रजा मभि भ्रातृव्यान् ।

(39)[P25] 7.4.7.1(33)– प्रजाम् ।

प्रजामिति प्र – जाम् ।

(40)[P25] 7.4.7.1(34)– अभि । भ्रातृव्यान् । भवन्ति ।

अभि भ्रातृव्यान् भ्रातृव्या नभ्यभि भ्रातृव्यान् भवन्ति भवन्ति भ्रातृव्या नभ्यभि भ्रातृव्यान् भवन्ति ।

(41)[P25] 7.4.7.1(35)– भ्रातृव्यान् । भवन्ति । त्रयः ।

भ्रातृव्यान् भवन्ति भवन्ति भ्रातृव्यान् भ्रातृव्यान् भवन्ति त्रय स्त्रयो भवन्ति भ्रातृव्यान् भ्रातृव्यान् भवन्ति त्रयः ।

(42)[P25] 7.4.7.1(36)– भवन्ति । त्रयः । त्रिवृतः ।

भवन्ति त्रय स्त्रयो भवन्ति भवन्ति त्रय स्त्रिवृत स्त्रिवृत स्त्रयो भवन्ति भवन्ति त्रय स्त्रिवृतः ।

(43)[P25] 7.4.7.1(37)– त्रयः । त्रिवृतः । अग्निष्टोमाः ।

त्रय स्त्रिवृत स्त्रिवृत स्त्रय स्त्रय स्त्रिवृतो ऽग्निष्टोमा अग्निष्टोमा स्त्रिवृत स्त्रय स्त्रय स्त्रिवृतो ऽग्निष्टोमाः ।

(44)[P25] 7.4.7.1(38)– त्रिवृतः । अग्निष्टोमाः । भवन्ति ।

त्रिवृतो ऽग्निष्टोमा अग्निष्टोमा स्त्रिवृत स्त्रिवृतो ऽग्निष्टोमा भवन्ति भव न्त्यग्निष्टोमा स्त्रिवृत स्त्रिवृतो ऽग्निष्टोमा भवन्ति ।

(45)[P25] 7.4.7.1(38)– त्रिवृतः ।

त्रिवृत इति त्रि – वृतः ।

(46)[P25] 7.4.7.1(39)– अग्निष्टोमाः । भवन्ति । वज्रस्य ।

अग्निष्टोमा भवन्ति भव न्त्यग्निष्टोमा अग्निष्टोमा भवन्ति वज्रस्य वज्रस्य भव न्त्यग्निष्टोमा अग्निष्टोमा भवन्ति वज्रस्य ।

(47)[P25] 7.4.7.1(39)– अग्निष्टोमाः ।

अग्निष्टोमा इत्यग्नि – स्तोमाः ।

(48)[P25] 7.4.7.1(40)– भवन्ति । वज्रस्य । एव ।

भवन्ति वज्रस्य वज्रस्य भवन्ति भवन्ति वज्रस्यैवैव वज्रस्य भवन्ति भवन्ति वज्रस्यैव ।

(49)[P25] 7.4.7.1(41)– वज्रस्य । एव । मुखम् ।

वज्रस्यैवैव वज्रस्य वज्रस्यैव मुखम् मुख मेव वज्रस्य वज्रस्यैव मुखम् ।

(50)[P25] 7.4.7.1(42)– एव । मुखम् । सम् ।

एव मुखम् मुख मेवैव मुख(ग्म्) स(ग्म्) सम् मुख मेवैव मुख(ग्म्) सम् ।

(51)[P25] 7.4.7.1(43)- मुखम् । सम् । श्यन्ति ।

मुख(ग्म्) स(ग्म्) सम् मुखम् मुख(ग्म्) स(ग्ग्) श्यन्ति श्यन्ति सम् मुखम् मुख(ग्म्) स(ग्ग्) श्यन्ति ।

(52)[P25] 7.4.7.1(44)- सम् । श्यन्ति । दश ।

स(ग्ग्) श्यन्ति श्यन्ति स(ग्म्) स(ग्ग्) श्यन्ति दश दश श्यन्ति स(ग्म्) स(ग्ग्) श्यन्ति दश ।

(53)[P25] 7.4.7.1(45)- श्यन्ति । दश । पञ्चदशाः ।

श्यन्ति दश दश श्यन्ति श्यन्ति दश पञ्चदशाः पञ्चदशा दश श्यन्ति श्यन्ति दश पञ्चदशाः ।

(54)[P25] 7.4.7.1(46)- दश । पञ्चदशाः । भवन्ति ।

दश पञ्चदशाः पञ्चदशा दश दश पञ्चदशा भवन्ति भवन्ति पञ्चदशा दश दश पञ्चदशा भवन्ति ।

(55)[P25] 7.4.7.1(47)- पञ्चदशाः । भवन्ति । पञ्चदशः ।

पञ्चदशा भवन्ति भवन्ति पञ्चदशाः पञ्चदशा भवन्ति पञ्चदशः पञ्चदशो भवन्ति पञ्चदशाः पञ्चदशा भवन्ति पञ्चदशः ।

(56)[P25] 7.4.7.1(47)- पञ्चदशाः ।

पञ्चदशा इति पञ्च - दशाः ।

(57)[P25] 7.4.7.1(48)- भवन्ति । पञ्चदशः । वज्रः ।

भवन्ति पञ्चदशः पञ्चदशो भवन्ति भवन्ति पञ्चदशो वज्रो वज्रः पञ्चदशो भवन्ति भवन्ति पञ्चदशो वज्रः ।

(58)[P25] 7.4.7.1(49)– पञ्चदशः । वज्रः । वज्रम् ।

पञ्चदशो वज्रो वज्रः पञ्चदशः पञ्चदशो वज्रो वज्रं ँवज्रं ँवज्रः पञ्चदशः पञ्चदशो वज्रो वज्रम् ।

(59)[P25] 7.4.7.1(49)– पञ्चदशः ।

पञ्चदश इति पञ्च – दशः ।

(60)[P25] 7.4.7.1(50)– वज्रः । वज्रम् । एव ।

वज्रो वज्रं ँवज्रं ँवज्रो वज्रो वज्र मेवैव वज्रं ँवज्रो वज्रो वज्र मेव ।

(1)[P26] 7.4.7.2(1)– वज्रम् । एव । भ्रातृव्येभ्यः ।

वज्र मेवैव वज्रं ँवज्र मेव भ्रातृव्येभ्यो भ्रातृव्येभ्य एव वज्रं ँवज्र मेव भ्रातृव्येभ्यः ।

(2)[P26] 7.4.7.2(2)– एव । भ्रातृव्येभ्यः । प्र ।

एव भ्रातृव्येभ्यो भ्रातृव्येभ्य एवैव भ्रातृव्येभ्यः प्र प्र भ्रातृव्येभ्य एवैव भ्रातृव्येभ्यः प्र ।

(3)[P26] 7.4.7.2(3)– भ्रातृव्येभ्यः । प्र । हरन्ति ।

भ्रातृव्येभ्यः प्र प्र भ्रातृव्येभ्यो भ्रातृव्येभ्यः प्र हरन्ति हरन्ति प्र भ्रातृव्येभ्यो भ्रातृव्येभ्यः प्र हरन्ति ।

(4)[P26] 7.4.7.2(4)– प्र । हरन्ति । षोडशिमत् ।

प्र हरन्ति हरन्ति प्र प्र हरन्ति षोडशिम थ्षोडशिम द्धरन्ति प्र प्र हरन्ति षोडशिमत् ।

(5)[P26] 7.4.7.2(5)– हरन्ति । षोडशिमत् । दशमम् ।

हरन्ति षोडशिम थ्षोडशिम द्धरन्ति हरन्ति षोडशिमद् दशमम् दशम(ग्म्) षोडशिम द्धरन्ति हरन्ति षोडशिमद् दशमम् ।

(6)[P26] 7.4.7.2(6)- षोडशिमत् । दशमम् । अहः ।

षोडशिमद् दशमम् दशम(ग्म्) षोडशिम थ्षोडशिमद् दशम मह रहर् दशम(ग्म्) षोडशिम थ्षोडशिमद् दशम महः ।

(7)[P26] 7.4.7.2(6)- षोडशिमत् ।

षोडशिमदिति षोडशि - मत् ।

(8)[P26] 7.4.7.2(7)- दशमम् । अहः । भवति ।

दशम मह रहर् दशमम् दशम महर् भवति भव त्यहर् दशमम् दशम महर् भवति ।

(9)[P26] 7.4.7.2(8)- अहः । भवति । वज्रे ।

अहर् भवति भव त्यह रहर् भवति वज्रे वज्रे भव त्यह रहर् भवति वज्रे ।

(10)[P26] 7.4.7.2(9)- भवति । वज्रे । एव ।

भवति वज्रे वज्रे भवति भवति वज्र एवैव वज्रे भवति भवति वज्र एव ।

(11)[P26] 7.4.7.2(10)- वज्रे । एव । वीर्यम् ।

वज्र एवैव वज्रे वज्र एव वीर्यं ँवीर्य मेव वज्रे वज्र एव वीर्यम् ।

(12)[P26] 7.4.7.2(11)- एव । वीर्यम् । दधति ।

एव वीर्यं ँवीर्य मेवैव वीर्यम् दधति दधति वीर्य मेवैव वीर्यम् दधति ।

(13)[P26] 7.4.7.2(12)- वीर्यम् । दधति । द्वादश ।

वीर्यम् दधति दधति वीर्यं ँवीर्यम् दधति द्वादश द्वादश दधति वीर्यं ँवीर्यम् दधति द्वादश ।

(14)[P26] 7.4.7.2(13)- दधति । द्वादश । सप्तदशाः ।

दधति द्वादश द्वादश दधति दधति द्वादश सप्तदशाः सप्तदशा द्वादश दधति दधति द्वादश सप्तदशाः ।

(15)[P26] 7.4.7.2(14)– द्वादश । सप्तदशाः । भवन्ति ।

द्वादश सप्तदशाः सप्तदशा द्वादश द्वादश सप्तदशा भवन्ति भवन्ति सप्तदशा द्वादश द्वादश सप्तदशा भवन्ति ।

(16)[P26] 7.4.7.2(15)– सप्तदशाः । भवन्ति । अन्नाद्यस्य ।

सप्तदशा भवन्ति भवन्ति सप्तदशाः सप्तदशा भव न्त्यन्नाद्यस्या न्नाद्यस्य भवन्ति सप्तदशाः सप्तदशा भव न्त्यन्नाद्यस्य ।

(17)[P26] 7.4.7.2(15)– सप्तदशाः ।

सप्तदशा इति सप्त – दशाः ।

(18)[P26] 7.4.7.2(16)– भवन्ति । अन्नाद्यस्य । अवरुद्ध्यै ।

भव न्त्यन्नाद्यस्या न्नाद्यस्य भवन्ति भव न्त्यन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्य भवन्ति भव न्त्यन्नाद्यस्या वरुद्ध्यै ।

(19)[P26] 7.4.7.2(17)– अन्नाद्यस्य । अवरुद्ध्यै । अथो ।

अन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्या अथो अथो अवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्या अथो ।

(20)[P26] 7.4.7.2(17)– अन्नाद्यस्य ।

अन्नाद्यस्येत्यन्न – अद्यस्य ।

(21)[P26] 7.4.7.2(18)– अवरुद्ध्यै । अथो । प्र ।

अवरुद्ध्या अथो अथो अवरुद्ध्या अवरुद्ध्या अथो प्र प्राथो अवरुद्ध्या अवरुद्ध्या अथो प्र ।

(22)[P26] 7.4.7.2(18)– अवरुद्ध्यै ।

अवरुद्ध्या इत्यव – रुद्ध्यै ।

(23)[P26] 7.4.7.2(19)- अथो । प्र । एव ।

अथो प्र प्राथो अथो प्रैवैव प्राथो अथो प्रैव ।

(24)[P26] 7.4.7.2(19)- अथो ।

अथो इत्यथो ।

(25)[P26] 7.4.7.2(20)- प्र । एव । तैः ।

प्रैवैव प्र प्रैव तै स्तै रेव प्र प्रैव तैः ।

(26)[P26] 7.4.7.2(21)- एव । तैः । जायन्ते ।

एव तै स्तै रेवैव तैर् जायन्ते जायन्ते तै रेवैव तैर् जायन्ते ।

(27)[P26] 7.4.7.2(22)- तैः । जायन्ते । पृष्ठ्यः ।

तैर् जायन्ते जायन्ते तै स्तैर् जायन्ते पृष्ठ्यः पृष्ठ्यो जायन्ते तै स्तैर् जायन्ते पृष्ठ्यः ।

(28)[P26] 7.4.7.2(23)- जायन्ते । पृष्ठ्यः । षडहः ।

जायन्ते पृष्ठ्यः पृष्ठ्यो जायन्ते जायन्ते पृष्ठ्य ष्षडह ष्षडहः पृष्ठ्यो जायन्ते जायन्ते पृष्ठ्य ष्षडहः ।

(29)[P26] 7.4.7.2(24)- पृष्ठ्यः । षडहः । भवति ।

पृष्ठ्य ष्षडह ष्षडहः पृष्ठ्यः पृष्ठ्य ष्षडहो भवति भवति षडहः पृष्ठ्यः पृष्ठ्य ष्षडहो भवति ।

(30)[P26] 7.4.7.2(25)- षडहः । भवति । षट् ।

षडहो भवति भवति षडह ष्षडहो भवति षट् थ्षड् भवति षडह ष्षडहो भवति षट् ।

(31)[P26] 7.4.7.2(25)- षडहः ।

षडह इति षट् - अहः ।

(32)[P26] 7.4.7.2(26)- भवति । षट् । वै ।

भवति षट् थ्षड् भवति भवति षड् वै वै षड् भवति भवति षड् वै ।

(33)[P26] 7.4.7.2(27)– षट् । वै । ऋतवः ।

षड् वै वै षट् थ्षड् वा ऋतव ऋतवो वै षट् थ्षड् वा ऋतवः ।

(34)[P26] 7.4.7.2(28)– वै । ऋतवः । षट् ।

वा ऋतव ऋतवो वै वा ऋतव ष्षट् थ्षडृतवो वै वा ऋतव ष्षट् ।

(35)[P26] 7.4.7.2(29)– ऋतवः । षट् । पृष्ठानि ।

ऋतव ष्षट् थ्षडृतव ऋतव ष्षट् पृष्ठानि पृष्ठानि षडृतव ऋतव ष्षट् पृष्ठानि ।

(36)[P26] 7.4.7.2(30)– षट् । पृष्ठानि । पृष्ठैः ।

षट् पृष्ठानि पृष्ठानि षट् थ्षट् पृष्ठानि पृष्ठैः पृष्ठैः पृष्ठानि षट् थ्षट् पृष्ठानि पृष्ठैः ।

(37)[P26] 7.4.7.2(31)– पृष्ठानि । पृष्ठैः । एव ।

पृष्ठानि पृष्ठैः पृष्ठैः पृष्ठानि पृष्ठानि पृष्ठै रेवैव पृष्ठैः पृष्ठानि पृष्ठानि पृष्ठै रेव ।

(38)[P26] 7.4.7.2(32)– पृष्ठैः । एव । ऋतून् ।

पृष्ठै रेवैव पृष्ठैः पृष्ठै रेव र्तू नृतू नेव पृष्ठैः पृष्ठै रेव र्तून् ।

(39)[P26] 7.4.7.2(33)– एव । ऋतून् । अन्वारोहन्ति ।

एव र्तू नृतू नेवैव र्तू नन्वारोह न्त्यन्वारोह न्त्यृतू नेवैव र्तू नन्वारोहन्ति ।

(40)[P26] 7.4.7.2(34)– ऋतून् । अन्वारोहन्ति । ऋतुभिः ।

ऋतू नन्वारोह न्त्यन्वारोह न्त्यृतू नृतू नन्वारोह न्त्यृतुभिर्. ऋतुभि रन्वारोह न्त्यृतू नृतू नन्वारोह न्त्यृतुभिः ।

(41)[P26] 7.4.7.2(35)– अन्वारोहन्ति । ऋतुभिः । सँवथ्सरम् ।

अन्वारोह न्त्यृतुभिर्. ऋतुभि रन्वारोह न्त्यन्वारोह न्त्यृतुभिः सँवथ्सर(गम्) सँवथ्सर मृतुभि रन्वारोह न्त्यन्वारोह न्त्यृतुभिः सँवथ्सरम् ।

(42)[P26] 7.4.7.2(35)- अ॒न्वारो॑हन्ति ।

अ॒न्वारो॑ह॒न्तीत्य॑नु - आरो॑हन्ति ।

(43)[P26] 7.4.7.2(36)- ऋ॒तुभि॑ः । सँ॒व॒थ्स॒रम् । ते ।

ऋ॒तुभि॑ः सँवथ्स॒र(ग्म्) सँ॑वथ्स॒र मृ॒तुभि॑र्. ऋ॒तुभि॑ः सँवथ्स॒रम् ते ते सँ॑वथ्स॒र मृ॒तुभि॑र्. ऋ॒तुभि॑ः सँवथ्स॒रम् ते ।

(44)[P26] 7.4.7.2(36)- ऋ॒तुभि॑ः ।

ऋ॒तुभि॒रित्यृ॒तु - भि॒ः ।

(45)[P26] 7.4.7.2(37)- सँ॒व॒थ्स॒रम् । ते । सँ॒व॒थ्स॒रे ।

सँ॒व॒थ्स॒रम् ते ते सँ॑वथ्स॒र(ग्म्) सँ॑वथ्स॒रम् ते सँ॑वथ्स॒रे सँ॑वथ्स॒रे ते सँ॑वथ्स॒र(ग्म्) सँ॑वथ्स॒रम् ते सँ॑वथ्स॒रे ।

(46)[P26] 7.4.7.2(37)- सँ॒व॒थ्स॒रम् ।

सँ॒व॒थ्स॒रमिति॑ सं - व॒थ्स॒रम् ।

(47)[P26] 7.4.7.2(38)- ते । सँ॒व॒थ्स॒रे । ए॒व ।

ते सँ॑वथ्स॒रे सँ॑वथ्स॒रे ते ते सँ॑वथ्स॒र ए॒वैव सँ॑वथ्स॒रे ते ते सँ॑वथ्स॒र ए॒व ।

(48)[P26] 7.4.7.2(39)- सँ॒व॒थ्स॒रे । ए॒व । प्रति॑ ।

सँ॒व॒थ्स॒र ए॒वैव सँ॑वथ्स॒रे सँ॑वथ्स॒र ए॒व प्रति॒ प्रत्ये॒व सँ॑वथ्स॒रे सँ॑वथ्स॒र ए॒व प्रति॑ ।

(49)[P26] 7.4.7.2(39)- सँ॒व॒थ्स॒रे ।

सँ॒व॒थ्स॒र इति॑ सं - व॒थ्स॒रे ।

(50)[P26] 7.4.7.2(40)- ए॒व । प्रति॑ । ति॒ष्ठ॒न्ति॒ ।

ए॒व प्रति॒ प्रत्ये॒वैव प्रति॑ तिष्ठन्ति तिष्ठन्ति॒ प्रत्ये॒वैव प्रति॑ तिष्ठन्ति ।

(51)[P26] 7.4.7.2(41)– प्रति । तिष्ठन्ति । द्वादश ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्ति द्वादश द्वादश तिष्ठन्ति प्रति प्रति तिष्ठन्ति द्वादश ।

(52)[P26] 7.4.7.2(42)– तिष्ठन्ति । द्वादश । एकवि(ग्म्)शाः ।

तिष्ठन्ति द्वादश द्वादश तिष्ठन्ति तिष्ठन्ति द्वादशैकवि(ग्म्)शा एकवि(ग्म्)शा द्वादश तिष्ठन्ति तिष्ठन्ति द्वादशैकवि(ग्म्)शाः ।

(53)[P26] 7.4.7.2(43)– द्वादश । एकवि(ग्म्)शाः । भवन्ति ।

द्वादशै कवि(ग्म्)शा एकवि(ग्म्)शा द्वादश द्वादशैकवि(ग्म्)शा भवन्ति भव न्त्येकवि(ग्म्)शा द्वादश द्वादशैकवि(ग्म्)शा भवन्ति ।

(54)[P26] 7.4.7.2(44)– एकवि(ग्म्)शाः । भवन्ति । प्रतिष्ठित्यै ।

एकवि(ग्म्)शा भवन्ति भव न्त्येकवि(ग्म्)शा एकवि(ग्म्)शा भवन्ति प्रतिष्ठित्यै प्रतिष्ठित्यै भव न्त्येकवि(ग्म्)शा एकवि(ग्म्)शा भवन्ति प्रतिष्ठित्यै ।

(55)[P26] 7.4.7.2(44)– एकवि(ग्म्)शाः ।

एकवि(ग्म्)शा इत्येक – वि(ग्म्)शाः ।

(56)[P26] 7.4.7.2(45)– भवन्ति । प्रतिष्ठित्यै । अथो ।

भवन्ति प्रतिष्ठित्यै प्रतिष्ठित्यै भवन्ति भवन्ति प्रतिष्ठित्या अथो अथो प्रतिष्ठित्यै भवन्ति भवन्ति प्रतिष्ठित्या अथो ।

(57)[P26] 7.4.7.2(46)– प्रतिष्ठित्यै । अथो । रुचम् ।

प्रतिष्ठित्या अथो अथो प्रतिष्ठित्यै प्रतिष्ठित्या अथो रुच(ग्म्) रुच मथो प्रतिष्ठित्यै प्रतिष्ठित्या अथो रुचम् ।

(58)[P26] 7.4.7.2(46)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(59)[P26] 7.4.7.2(47)- अथो । रुचम् । एव ।

अथो रुच(ग्म्) रुच मथो अथो रुच मेवैव रुच मथो अथो रुच मेव ।

(60)[P26] 7.4.7.2(47)- अथो ।

अथो इत्यथो ।

(61)[P26] 7.4.7.2(48)- रुचम् । एव । आत्मन्न् ।

रुच मेवैव रुच(ग्म्) रुच मेवात्मन् नात्मन् नेव रुच(ग्म्) रुच मेवात्मन्न् ।

(62)[P26] 7.4.7.2(49)- एव । आत्मन्न् । दधते ।

एवात्मन् नात्मन् नेवै वात्मन् दधते दधत आत्मन् नेवै वात्मन् दधते ।

(63)[P26] 7.4.7.2(50)- आत्मन्न् । दधते । बहवः ।

आत्मन् दधते दधत आत्मन् नात्मन् दधते बहवो बहवो दधत आत्मन् नात्मन् दधते बहवः ।

(1)[P27] 7.4.7.3(1)- दधते । बहवः । षोडशिनः ।

दधते बहवो बहवो दधते दधते बहव ष्षोडशिन ष्षोडशिनो बहवो दधते दधते बहव ष्षोडशिनः ।

(2)[P27] 7.4.7.3(2)- बहवः । षोडशिनः । भवन्ति ।

बहव ष्षोडशिन ष्षोडशिनो बहवो बहव ष्षोडशिनो भवन्ति भवन्ति षोडशिनो बहवो बहव ष्षोडशिनो भवन्ति ।

(3)[P27] 7.4.7.3(3)- षोडशिनः । भवन्ति । विजित्यै ।

षोडशिनो भवन्ति भवन्ति षोडशिन ष्षोडशिनो भवन्ति विजित्यै विजित्यै भवन्ति षोडशिन ष्षोडशिनो भवन्ति विजित्यै ।

(4)[P27] 7.4.7.3(4)- भवन्ति । विजित्यै । षट् ।

भवन्ति विजित्यै विजित्यै भवन्ति भवन्ति विजित्यै षट् थ्षड् विजित्यै भवन्ति भवन्ति विजित्यै षट् ।

(5)[P27] 7.4.7.3(5)- विजित्यै । षट् । आश्विनानि ।

विजित्यै षट् थ्षड् विजित्यै विजित्यै षडाश्विनान्या श्विनानि षड् विजित्यै विजित्यै षडाश्विनानि ।

(6)[P27] 7.4.7.3(5)- विजित्यै ।

विजित्या इति वि - जित्यै ।

(7)[P27] 7.4.7.3(6)- षट् । आश्विनानि । भवन्ति ।

षडाश्विना न्याश्विनानि षट् थ्षडाश्विनानि भवन्ति भव न्त्याश्विनानि षट् थ्षडाश्विनानि भवन्ति ।

(8)[P27] 7.4.7.3(7)- आश्विनानि । भवन्ति । षट् ।

आश्विनानि भवन्ति भव न्त्याश्विना न्याश्विनानि भवन्ति षट् थ्षड् भव न्त्याश्विना न्याश्विनानि भवन्ति षट् ।

(9)[P27] 7.4.7.3(8)- भवन्ति । षट् । वै ।

भवन्ति षट् थ्षड् भवन्ति भवन्ति षड् वै वै षड् भवन्ति भवन्ति षड् वै ।

(10)[P27] 7.4.7.3(9)- षट् । वै । ऋतवः ।

षड् वै वै षट् थ्षड् वा ऋतव ऋतवो वै षट् थ्षड् वा ऋतवः ।

(11)[P27] 7.4.7.3(10)- वै । ऋतवः । ऋतुषु ।

वा ऋतव ऋतवो वै वा ऋतव ऋतुष् वृतुष् वृतवो वै वा ऋतव ऋतुषु ।

(12)[P27] 7.4.7.3(11)- ऋतवः । ऋतुषु । एव ।

ऋतव ऋतुष् वृतुष् वृतव ऋतव ऋतुष् वेवैव र्तुष् वृतव ऋतव ऋतुष् वेव ।

(13)[P27] 7.4.7.3(12)- ऋतुषु । एव । प्रति ।

ऋतुष् वेवैव र्तुष् वृतुष् वेव प्रति प्रत्येव र्तुष् वृतुष् वेव प्रति ।

(14)[P27] 7.4.7.3(13)- एव । प्रति । तिष्ठन्ति ।

एव प्रति प्रत्येवैव प्रति तिष्ठन्ति तिष्ठन्ति प्रत्येवैव प्रति तिष्ठन्ति ।

(15)[P27] 7.4.7.3(14)- प्रति । तिष्ठन्ति । ऊनातिरिक्ताः ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यूनातिरिक्ता ऊनातिरिक्ता स्तिष्ठन्ति प्रति प्रति तिष्ठ न्त्यूनातिरिक्ताः ।

(16)[P27] 7.4.7.3(15)- तिष्ठन्ति । ऊनातिरिक्ताः । वै ।

तिष्ठ न्त्यूनातिरिक्ता ऊनातिरिक्ता स्तिष्ठन्ति तिष्ठ न्त्यूनातिरिक्ता वै वा ऊनातिरिक्ता स्तिष्ठन्ति तिष्ठ न्त्यूनातिरिक्ता वै ।

(17)[P27] 7.4.7.3(16)- ऊनातिरिक्ताः । वै । एताः ।

ऊनातिरिक्ता वै वा ऊनातिरिक्ता ऊनातिरिक्ता वा एता एता वा ऊनातिरिक्ता ऊनातिरिक्ता वा एताः ।

(18)[P27] 7.4.7.3(16)- ऊनातिरिक्ताः ।

ऊनातिरिक्ता इत्यून - अतिरिक्ताः ।

(19)[P27] 7.4.7.3(17)- वै । एताः । रात्रयः ।

वा एता एता वै वा एता रात्रयो रात्रय एता वै वा एता रात्रयः ।

(20)[P27] 7.4.7.3(18)- एताः । रात्रयः । ऊनाः ।

एता रात्रयो रात्रय एता एता रात्रय ऊना ऊना रात्रय एता एता रात्रय ऊनाः ।

(21)[P27] 7.4.7.3(19)– रात्रयः । ऊनाः । तत् ।

रात्रय ऊना ऊना रात्रयो रात्रय ऊना स्तत् तदूना रात्रयो रात्रय ऊना स्तत् ।

(22)[P27] 7.4.7.3(20)– ऊनाः । तत् । यत् ।

ऊना स्तत् तदूना ऊना स्तद् यद् यत् तदूना ऊना स्तद् यत् ।

(23)[P27] 7.4.7.3(21)– तत् । यत् । एकस्यै ।

तद् यद् यत् तत् तद् यदेकस्या एकस्यै यत् तत् तद् यदेकस्यै ।

(24)[P27] 7.4.7.3(22)– यत् । एकस्यै । न ।

यदेकस्या एकस्यै यद् यदेकस्यै न नैकस्यै यद् यदेकस्यै न ।

(25)[P27] 7.4.7.3(23)– एकस्यै । न । पञ्चाशत् ।

एकस्यै न नैकस्या एकस्यै न पञ्चाशत् पञ्चाशन् नैकस्या एकस्यै न पञ्चाशत् ।

(26)[P27] 7.4.7.3(24)– न । पञ्चाशत् । अतिरिक्ताः ।

न पञ्चाशत् पञ्चाशन् न न पञ्चाश दतिरिक्ता अतिरिक्ताः पञ्चाशन् न न पञ्चाश दतिरिक्ताः ।

(27)[P27] 7.4.7.3(25)– पञ्चाशत् । अतिरिक्ताः । तत् ।

पञ्चाश दतिरिक्ता अतिरिक्ताः पञ्चाशत् पञ्चाश दतिरिक्ता स्तत् तदतिरिक्ताः पञ्चाशत् पञ्चाश दतिरिक्ता स्तत् ।

(28)[P27] 7.4.7.3(26)– अतिरिक्ताः । तत् । यत् ।

अतिरिक्ता स्तत् तदतिरिक्ता अतिरिक्ता स्तद् यद् यत् तदतिरिक्ता अतिरिक्ता स्तद् यत् ।

(29)[P27] 7.4.7.3(26)– अतिरिक्ताः ।

अतिरिक्ता इत्यति – रिक्ताः ।

(30)[P27] 7.4.7.3(27)– तत् । यत् । भूयसीः ।

तद् यद् यत् तत् तद् यद् भूयसीर् भूयसीर् यत् तत् तद् यद् भूयसीः ।

(31)[P27] 7.4.7.3(28)– यत् । भूयसीः । अष्टाचत्वारि(ग्म्)शतः ।

यद् भूयसीर् भूयसीर् यद् यद् भूयसी रष्टाचत्वारि(ग्म्)शतो ऽष्टाचत्वारि(ग्म्)शतो भूयसीर् यद् यद् भूयसी रष्टाचत्वारि(ग्म्)शतः ।

(32)[P27] 7.4.7.3(29)– भूयसीः । अष्टाचत्वारि(ग्म्)शतः । ऊनात् ।

भूयसी रष्टाचत्वारि(ग्म्)शतो ऽष्टाचत्वारि(ग्म्)शतो भूयसीर् भूयसी रष्टाचत्वारि(ग्म्)शत ऊना दूना दष्टाचत्वारि(ग्म्)शतो भूयसीर् भूयसी रष्टाचत्वारि(ग्म्)शत ऊनात् ।

(33)[P27] 7.4.7.3(30)– अष्टाचत्वारि(ग्म्)शतः । ऊनात् । च ।

अष्टाचत्वारि(ग्म्)शत ऊना दूना दष्टाचत्वारि(ग्म्)शतो ऽष्टाचत्वारि(ग्म्)शत ऊनाच् च चोना दष्टाचत्वारि(ग्म्)शतो ऽष्टाचत्वारि(ग्म्)शत ऊनाच् च ।

(34)[P27] 7.4.7.3(30)– अष्टाचत्वारि(ग्म्)शतः ।

अष्टाचत्वारि(ग्म्)शत इत्यष्टा – चत्वारि(ग्म्)शतः ।

(35)[P27] 7.4.7.3(31)– ऊनात् । च । खलु ।

ऊनाच् च चोना दूनाच् च खलु खलु चोना दूनाच् च खलु ।

(36)[P27] 7.4.7.3(32)– च । खलु । वै ।

च खलु खलु च च खलु वै वै खलु च च खलु वै ।

(37)[P27] 7.4.7.3(33)– खलु । वै । अतिरिक्तात् ।

खलु वै वै खलु खलु वा अतिरिक्ता दतिरिक्ताद् वै खलु खलु वा अतिरिक्तात् ।

(38)[P27] 7.4.7.3(34)– वै । अतिरिक्तात् । च ।

वा अतिरिक्ता दतिरिक्ताद् वै वा अतिरिक्ताच् च चातिरिक्ताद् वै वा अतिरिक्ताच् च ।

(39)[P27] 7.4.7.3(35)– अतिरिक्तात् । च । प्रजापतिः ।

अतिरिक्ताच् च चातिरिक्ता दतिरिक्ताच् च प्रजापतिः प्रजापति श्चातिरिक्ता दतिरिक्ताच् च प्रजापतिः ।

(40)[P27] 7.4.7.3(35)– अतिरिक्तात् ।

अतिरिक्तादित्यति – रिक्तात् ।

(41)[P27] 7.4.7.3(36)– च । प्रजापतिः । प्र ।

च प्रजापतिः प्रजापति श्च च प्रजापतिः प्र प्र प्रजापति श्च च प्रजापतिः प्र ।

(42)[P27] 7.4.7.3(37)– प्रजापतिः । प्र । अजायत ।

प्रजापतिः प्र प्र प्रजापतिः प्रजापतिः प्रा जायता जायत प्र प्रजापतिः प्रजापतिः प्रा जायत ।

(43)[P27] 7.4.7.3(37)– प्रजापतिः ।

प्रजापतिरिति प्रजा – पतिः ।

(44)[P27] 7.4.7.3(38)– प्र । अजायत । ये ।

प्रा जायता जायत प्र प्राजायत ये ये ऽजायत प्र प्रा जायत ये ।

(45)[P27] 7.4.7.3(39)– अजायत । ये । प्रजाकामाः ।

अजायत ये ये ऽजायता जायत ये प्रजाकामाः प्रजाकामा ये ऽजायता जायत ये प्रजाकामाः ।

(46)[P27] 7.4.7.3(40)– ये । प्रजाकामाः । पशुकामाः ।

ये प्रजाकामाः प्रजाकामा ये ये प्रजाकामाः पशुकामाः पशुकामाः प्रजाकामा ये ये प्रजाकामाः पशुकामाः ।

(47)[P27] 7.4.7.3(41)– प्रजाकामाः । पशुकामाः । स्युः ।

प्रजाकामाः पशुकामाः पशुकामाः प्रजाकामाः प्रजाकामाः पशुकामाः स्युः स्युः पशुकामाः प्रजाकामाः प्रजाकामाः पशुकामाः स्युः ।

(48)[P27] 7.4.7.3(41)- प्रजाकामाः ।

प्रजाकामा इति प्रजा - कामाः ।

(49)[P27] 7.4.7.3(42)- पशुकामाः । स्युः । ते ।

पशुकामाः स्युः स्युः पशुकामाः पशुकामाः स्यु स्ते ते स्युः पशुकामाः पशुकामाः स्यु स्ते ।

(50)[P27] 7.4.7.3(42)- पशुकामाः ।

पशुकामा इति पशु - कामाः ।

(51)[P27] 7.4.7.3(43)- स्युः । ते । एताः ।

स्यु स्ते ते स्युः स्यु स्त एता एता स्ते स्युः स्यु स्त एताः ।

(52)[P27] 7.4.7.3(44)- ते । एताः । आसीरन्न् ।

त एता एता स्ते त एता आसीरन् नासीरन् नेता स्ते त एता आसीरन्न् ।

(53)[P27] 7.4.7.3(45)- एताः । आसीरन्न् । प्र ।

एता आसीरन् नासीरन् नेता एता आसीरन् प्र प्रासीरन् नेता एता आसीरन् प्र ।

(54)[P27] 7.4.7.3(46)- आसीरन्न् । प्र । एव ।

आसीरन् प्र प्रासीरन् नासीरन् प्रैवैव प्रासीरन् नासीरन् प्रैव ।

(55)[P27] 7.4.7.3(47)- प्र । एव । जायन्ते ।

प्रैवैव प्र प्रैव जायन्ते जायन्त एव प्र प्रैव जायन्ते ।

(56)[P27] 7.4.7.3(48)- एव । जायन्ते । प्रजया ।

एव जायन्ते जायन्त एवैव जायन्ते प्रजया प्रजया जायन्त एवैव जायन्ते प्रजया ।

(57)[P27] 7.4.7.3(49)– जायन्ते । प्रजया । पशुभिः ।

जायन्ते प्रजया प्रजया जायन्ते जायन्ते प्रजया पशुभिः पशुभिः प्रजया जायन्ते जायन्ते प्रजया पशुभिः ।

(58)[P27] 7.4.7.3(50)– प्रजया । पशुभिः । वैराजः ।

प्रजया पशुभिः पशुभिः प्रजया प्रजया पशुभिर् वैराजो वैराजः पशुभिः प्रजया प्रजया पशुभिर् वैराजः ।

(59)[P27] 7.4.7.3(50)– प्रजया ।

प्रजयेति प्र – जया ।

(60)[P27] 7.4.7.3(51)– पशुभिः । वैराजः । वै ।

पशुभिर् वैराजो वैराजः पशुभिः पशुभिर् वैराजो वै वै वैराजः पशुभिः पशुभिर् वैराजो वै ।

(61)[P27] 7.4.7.3(51)– पशुभिः ।

पशुभिरिति पशु – भिः ।

(62)[P27] 7.4.7.3(52)– वैराजः । वै । एषः ।

वैराजो वै वै वैराजो वैराजो वा एष एष वै वैराजो वैराजो वा एषः ।

(63)[P27] 7.4.7.3(53)– वै । एषः । यज्ञः ।

वा एष एष वै वा एष यज्ञो यज्ञ एष वै वा एष यज्ञः ।

(64)[P27] 7.4.7.3(54)– एषः । यज्ञः । यत् ।

एष यज्ञो यज्ञ एष एष यज्ञो यद् यद् यज्ञ एष एष यज्ञो यत् ।

(65)[P27] 7.4.7.3(55)– यज्ञः । यत् । एकस्मान्नपञ्चाशः ।

यज्ञो यद् यद् यज्ञो यज्ञो यदेकस्मान्नपञ्चाश एकस्मान्नपञ्चाशो यद् यज्ञो यज्ञो यदेकस्मान्नपञ्चाशः ।

(66)[P27] 7.4.7.3(56)- यत् । एकस्मान्नपञ्चाशः । ये ।

यदेकस्मान्नपञ्चाश एकस्मान्नपञ्चाशो यद् यदेकस्मान्नपञ्चाशो ये य एकस्मान्नपञ्चाशो यद् यदेकस्मान्नपञ्चाशो ये ।

(67)[P27] 7.4.7.3(57)- एकस्मान्नपञ्चाशः । ये । एवम् ।

एकस्मान्नपञ्चाशो ये य एकस्मान्नपञ्चाश एकस्मान्नपञ्चाशो य एव मेवं ँय एकस्मान्नपञ्चाश एकस्मान्नपञ्चाशो य एवम् ।

(68)[P27] 7.4.7.3(57)- एकस्मान्नपञ्चाशः ।

एकस्मान्नपञ्चाश इत्येकस्मात् - नपञ्चाशः ।

(69)[P27] 7.4.7.3(58)- ये । एवम् । विद्वा(ग्म्)सः ।

य एव मेवं ँये य एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एवं ँये य एवं ँविद्वा(ग्म्)सः ।

(70)[P27] 7.4.7.3(59)- एवम् । विद्वा(ग्म्)सः । एकस्मान्नपञ्चाशम् ।

एवं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाशं ँविद्वा(ग्म्)स एव मेवं ँविद्वा(ग्म्)स एकस्मान्नपञ्चाशम् ।

(71)[P27] 7.4.7.3(60)- विद्वा(ग्म्)सः । एकस्मान्नपञ्चाशम् । आसते ।

विद्वा(ग्म्)स एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाशं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एकस्मान्नपञ्चाश मासत आसत एकस्मान्नपञ्चाशं ँविद्वा(ग्म्)सो विद्वा(ग्म्)स एकस्मान्नपञ्चाश मासते ।

(72)[P27] 7.4.7.3(61)- एकस्मान्नपञ्चाशम् । आसते । विराजम् ।

एकस्मान्नपञ्चाश मासत आसत एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मासते विराजं ँविराज मासत एकस्मान्नपञ्चाश मेकस्मान्नपञ्चाश मासते विराजम् ।

(73)[P27] 7.4.7.3(61)- एकस्मान्नपञ्चाशम् ।

एकस्मान्नपञ्चाशमित्येकस्मात् - नपञ्चाशम् ।

(74)[P27] 7.4.7.3(62)– आसते । विराजम् । एव ।

आसते विराजं ँविराज मासत आसते विराज मेवैव विराज मासत आसते विराज मेव ।

(75)[P27] 7.4.7.3(63)– विराजम् । एव । गच्छन्ति ।

विराज मेवैव विराजं ँविराज मेव गच्छन्ति गच्छ न्त्येव विराजं ँविराज मेव गच्छन्ति ।

(76)[P27] 7.4.7.3(63)– विराजम् ।

विराजमिति वि – राजम् ।

(77)[P27] 7.4.7.3(64)– एव । गच्छन्ति । अन्नादाः ।

एव गच्छन्ति गच्छ न्त्येवैव गच्छ न्त्यन्नादा अन्नादा गच्छ न्त्येवैव गच्छ न्त्यन्नादाः ।

(78)[P27] 7.4.7.3(65)– गच्छन्ति । अन्नादाः । भवन्ति ।

गच्छ न्त्यन्नादा अन्नादा गच्छन्ति गच्छ न्त्यन्नादा भवन्ति भव न्त्यन्नादा गच्छन्ति गच्छ न्त्यन्नादा भवन्ति ।

(79)[P27] 7.4.7.3(66)– अन्नादाः । भवन्ति । अतिरात्रौ ।

अन्नादा भवन्ति भव न्त्यन्नादा अन्नादा भव न्त्यतिरात्रा वतिरात्रौ भव न्त्यन्नादा अन्नादा भव न्त्यतिरात्रौ ।

(80)[P27] 7.4.7.3(66)– अन्नादाः ।

अन्नादा इत्यन्न – अदाः ।

(81)[P27] 7.4.7.3(67)– भवन्ति । अतिरात्रौ । अभितः ।

भव न्त्यतिरात्रा वतिरात्रौ भवन्ति भव न्त्यतिरात्रा वभितो ऽभितो ऽतिरात्रौ भवन्ति भव न्त्यतिरात्रा वभितः ।

(82)[P27] 7.4.7.3(68)- अतिरात्रौ । अभितः । भवतः ।

अतिरात्रा वभितो ऽभितो ऽतिरात्रा वतिरात्रा वभितो भवतो भवतो ऽभितो ऽतिरात्रा वतिरात्रा वभितो भवतः ।

(83)[P27] 7.4.7.3(68)- अतिरात्रौ ।

अतिरात्रावित्यति - रात्रौ ।

(84)[P27] 7.4.7.3(69)- अभितः । भवतः । अन्नाद्यस्य ।

अभितो भवतो भवतो ऽभितो ऽभितो भवतो ऽन्नाद्यस्या न्नाद्यस्य भवतो ऽभितो ऽभितो भवतो ऽन्नाद्यस्य ।

(85)[P27] 7.4.7.3(70)- भवतः । अन्नाद्यस्य । परिगृहीत्यै ॥

भवतो ऽन्नाद्यस्या न्नाद्यस्य भवतो भवतो ऽन्नाद्यस्य परिगृहीत्यै परिगृहीत्या अन्नाद्यस्य भवतो भवतो ऽन्नाद्यस्य परिगृहीत्यै ।

(86)[P27] 7.4.7.3(71)- अन्नाद्यस्य । परिगृहीत्यै ॥

